संयोगस्वरूपादिसंसर्गभानापत्तिः स्यादिति शङ्कायां तार्किकचक्रचक्रवर्ती श्रीमद्गदाधरभट्टाचार्यो नियामकं ब्रूते– 'शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते'[१] इति।

चस्त्वर्थे विद्यते। एकपदार्थे इति सप्तम्या अनुयोगित्वमर्थः। तत्र प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः। अनुयोगित्वस्य च निरूपकत्वसम्बन्धेन संसर्गेऽन्वयः। अपरपदार्थस्येति षष्ठ्याः प्रतियोगित्वमर्थः। तत्र प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः। तस्य च निरूपकत्वसम्बन्धेन संसर्गेऽन्वयः। संसर्गोऽभेदादिः। शाब्दबोधे इति सप्तम्या निरूपितत्वमर्थः। संसर्गमर्यादया आकाङ्क्षेत्यर्थः। तृतीयायाश्च प्रयोज्यत्वमर्थः। भासेर्विषयत्वमर्थः। आश्रयत्वञ्चाख्यातार्थः। तस्य च स्वरूपसम्बन्धेन संसर्गेऽन्वयः। एवञ्च एकपदार्थनिष्ठानुयोगितानिरूपकोऽपरपदार्थनिष्ठप्रतियोगितानिरूपकः संसर्गोऽभेदादिः शाब्दबोधनिरूपिताकाङ्क्षाप्रयोज्यविषयतावान् भवति इति फलति। यथा– राज्ञः पुरुषः इत्युदाहरणम्। अत्र स्वत्वसम्बन्धेन राजविशिष्टपुरुषः इति बोधः। बोधेऽस्मिन् राजा प्रतियोगी, पुरुषः अनुयोगी, स्वत्वञ्च संसर्गः। ततश्च पुरुषपदार्थनिष्ठानुयोगितानिरूपकः राजपदार्थनिष्ठप्रतियोगितानिरूपकः स्वत्वरूपसंसर्गः शाब्दबोधनिरूपिताकाङ्क्षाप्रयोज्यविषयतावान् भवति इति समन्वयः।

**२. क्वाभेदान्वयः?**

संसर्गो द्विविधः– क्वचिदभेदलक्षणः, क्वचिच्च भेदलक्षणः। तत्राभेदान्वयः क्व भवति इत्यत्र नियामकमाह नैयायिकमूर्धन्यो गदाधरः– 'अभेदश्च प्रातिपदिकार्थे





स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते'[२] इति। प्रातिपदिकार्थे स्वसमानविभक्तिकेन पदेनोपस्थापितस्य पदार्थस्याभेदः संसर्गमर्यादया भासते, प्रातिपदिकार्थे स्वाव्यवहितपूर्ववर्तिना पदेनोपस्थापितस्य पदार्थस्याभेदः संसर्गमर्यादया भासते इत्यन्वयः। प्रातिपदिकार्थे स्वसमानविभक्तिकस्वाव्यवहितपूर्ववर्त्यन्यतरपदोपस्थाप्यार्थस्यैवाभेदः संसर्गमर्यादया भासते इत्यर्थः। प्रातिपदिकार्थे इत्यत्र सप्तम्या अनुयोगित्वमर्थः। तत्र प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः। अनुयोगितायाश्चाभेदे निरूपकत्वसम्बन्धेनान्वयः। उपस्थापितस्येति षष्ठ्याः प्रतियोगित्वमर्थः। तत्र प्रकृत्यर्थस्य निष्ठत्वसम्बन्धेनान्वयः। प्रतियोगितायाश्चाभेदे निरूपकत्वसम्बन्धेनान्वयः। संसर्गमर्यादया आकाङ्क्षेत्यर्थः। तृतीयायाश्च प्रयोज्यत्वमर्थः। भास्धातोर्विषयत्वमर्थः। आश्रयत्वञ्चाख्यातार्थः। तस्य च स्वरूपसम्बन्धेन अभेदेऽन्वयः। एवञ्च प्रातिपदिकार्थनिष्ठानुयोगितानिरूपकः स्वसमानविभक्तिकस्वाव्यवहितपूर्वान्यतरपदोपस्थापितार्थनिष्ठ-प्रतियोगितानिरूपकोऽभेद आकाङ्क्षाप्रयोज्यविषयतावान् भवतीति फलितोऽर्थः। अनुगमार्थमेवं वक्तव्यम्–

- प्रातिपदिकविशिष्टोऽभेद आकाङ्क्षाप्रयोज्यविषयतावान् भवति।
- वैशिष्ट्यञ्च स्वप्रयोज्यविशेष्यतानिरूपकत्वस्वविशिष्टप्रयोज्यप्रकारता-निरूपकत्वेत्युभयसम्बन्धेन।
- वैशिष्ट्यञ्च स्वप्रकृतिकविभक्तिसजातीयविभक्तिप्रकृतित्वस्वाव्यवहित-पूर्ववृत्तित्वान्यतरसम्बन्धेन।

स्वपदेनात्रानुयोगिवाचकपदं ग्राह्यम्। यथा– नीलो घटः इत्यत्र घटरूपप्रातिपदिकविशिष्टोऽभेदः। तथाहि- स्वं घटपदं तत्प्रयोज्या या घटनिष्ठविशेष्यता तन्निरूपकत्वमभेदे, स्वं घटपदं तद्विशिष्टं नीलपदं, स्वं घटपदं तत्प्रकृतिकसुविभक्तिसजातीयसुविभक्तिप्रकृतित्वं नीलपदे इति स्वविशिष्टपदं नीलपदं तत्प्रयोज्या या नीलनिष्ठप्रकारता तन्निरूपकत्वमभेदे इति हेतोः स आकाङ्क्षाप्रयोज्यविषयतावान् भवति इति समन्वयः। समासस्थले नीलघटः इत्युदाहरणम्। तथाहि- स्वं घटपदं तत्प्रयोज्या या घटनिष्ठविशेष्यता तन्निरूपकत्वमभेदे, स्वं घटपदं तद्विशिष्टं नीलपदं, स्वं घटपदं तदव्यवहितपूर्ववृत्तित्वं नीलपदे इति स्वविशिष्टपदं नीलपदं तत्प्रयोज्या या नीलनिष्ठप्रकारता तन्निरूपकत्वमभेदे इति हेतोः स आकाङ्क्षाप्रयोज्यविषयतावान् भवति इति समन्वयः। नीलस्य घटः इत्यत्र तु न नीलपदार्थस्याभेदसम्बन्धेन घटेऽन्वयः, सर्वानुभवविरुद्धत्वात्। प्रकृते समानविभक्तिकत्वञ्च ‘स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम्’[३] इति। स्वप्रकृतिकविभक्तिसजातीयविभक्तिप्रकृतित्वमिति तदर्थः। स्वपदेनेहानुयोगिवाचकं पदं ग्राह्यम्। यथा– नीलो घटः इत्यत्र स्वं घटपदं तत्प्रकृतिकविभक्तिसुविभक्तिस्तत्सजातीयविभक्तिः सुविभक्तिस्तत्प्रकृतित्वं नीलपदे इति सिद्धं नीलघटयोः समानविभक्तिकत्वम्। वेदाः प्रमाणमित्यत्रापि स्वं वेदपदं तत्प्रकृतिकविभक्तिजस्विभक्तिस्तत्सजातीयविभक्तिः सुविभक्तिस्तत्प्रकृतित्वं प्रमाणपदे इति सिद्धं वेदप्रमाणपदयोः समानविभक्तिकत्वम्। ननु वेदपदोत्तरं जस्विभक्तिः, प्रमाणपदोत्तरं सुविभक्तिस्तयोः कथं साजात्यमित्याशङ्कायामाह–





‘साजात्यञ्च विभक्तिविभाजकप्रथमात्वादिना न तु समानानुपूर्वीकत्वं साजात्यम्’[४] इति। विभक्तिविभाजकप्रथमात्वादिधर्मेणेह साजात्यं ग्राह्यं, सुजसोरुभयोरपि प्रथमात्वेन साजात्यस्य सत्त्वात् सिद्धं समानविभक्तिककत्वम्। एतेन जस्प्रत्ययान्तवेदपदस्य सुप्रत्ययान्तप्रमाणपदस्य च विरुद्धविभक्तिकत्वेनाभेदेन प्रमाणस्य वेदेऽन्वयो न स्यात, इष्टश्चान्वयः इत्यतः पूर्वोक्तो नियमो न युक्त इति वदन्तः परास्ताः।

स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वघटकस्वप्रकृतिकत्वञ्च स्वनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वमिति शाब्दिकाः। घटादिपदमुद्दिश्य विभक्तेर्विधानाद् घटनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वं विभक्ताविति स्वप्रकृतिकत्वं विभक्तौ। परन्तु विभक्तिनिष्ठघटनिष्ठोद्देश्यतावत्त्वस्य शाब्दिकेतराणां ज्ञानासम्भवात् नैयायिकाभिमतं तत्त्वमाह– ‘स्वप्रकृतिकत्वञ्च स्वाव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वम्’[५] इति। स्वं घटादिपदं तदव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वं स्मृतिविषयत्वं विभक्ताविति समन्वयः। स्वप्रकृतिकत्वं स्वाव्यवहितोत्तरत्वेन विद्यमानत्वमित्यस्वीकृत्य स्वाव्यवहितोत्तरत्वेन प्रतिसन्धीयमानत्वमिति स्वीकारादेव दधि सुन्दरम् इत्यादौ दधिरूपविशेष्यवाचकपदोत्तरविभक्तेरसत्त्वेऽपि दधिपदाव्यवहितोत्तरत्वेन स्मृतिविषयत्वस्य सत्त्वान्न दोषः। एवं स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वमपि स्वप्रकृतिकविभक्त्यव्यवहित-पूर्ववर्तितया प्रतिसन्धीयमानत्वमित्यवधेयम्। ततश्च इदं दधि इत्यत्र दधिरूप-विशेषणवाचकपदोत्तरविभक्तेरभावेऽपि विभक्तेः प्रतिसन्धीयमानत्वात् तदव्यवहित-पूर्ववर्तितया प्रतिसन्धीयमानत्वरूपं ज्ञानविषयतवं दधिपदेऽस्तीति न दोषः।

**३. वेदाः प्रमाणमित्यस्यासाधुत्वाक्षेपः**

या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे॥

इति उत्सर्गवचने प्रायग्रहणेन असति विशेषानुशासने विशेष्यविशेषणवाचकपद्योः समानवचनकत्वनियमोऽभ्युपगम्यते। यथा– शतं ब्राह्मणाः इति। अत्र 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः'[६] इति विशेषानुशासनस्य सत्त्वात् ब्राह्मणरूपविशेष्यशतरूपविशेषणपद्योर्न समानवचनकत्वम्। यत्र च न विशेषानुशासनं तत्र तु समानवचनकत्वमेवेति कृत्वा वेदाः प्रमाणम् इत्यस्यासाधुत्वापत्तिः। पूर्वोक्तनियमानङ्गीकारे तु घटा नीलः इत्यादीनामपि साधुतापत्तिः।

**३.१. समानलिङ्गकस्थले समानवचकत्वनियमः इति दोषोद्धारनिराकरणम्–** विशेष्यविशेषणवाचकपद्योर्यत्र समानलिङ्गकत्वं भवति तत्रैव समानवचनकत्वनियमः। यथा– नीलो घटः इत्यादौ विशेषणवाचकनीलपदविशेष्यवाचकघटपद्योः समानलिङ्गकत्वमस्तीत्यतस्तत्र समानवाचकत्वनियमः। वेदाः प्रमाणम् इत्यत्र तु वेदप्रमाणपद्योः समानलिङ्गकत्वाभावेन न दोषः इति चेन्न। तथा सति

'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥'[७]

इति काव्यप्रकाशकारिकायाः 'इति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः'[८] इत्याकारकं व्याख्यानमसङ्गतं स्यात्,





त्रिपदहेतुपदयोरुभयोरपि पुंल्लिङ्गत्वेन समानलिङ्गकत्वात् समानवचनकत्वेन भाव्यम्। एवञ्च समानलिङ्गकस्थले एव नियमप्रवृत्त्यभ्युपगमेन असमानलिङ्गकस्थले विशेष्यवाचकपदासमानवचनस्यापि विशेषणपदस्य साधुत्वात् असमानलिङ्गकस्थले सर्वत्रौत्सर्गिकमेकवचनमेव विशेषणवाचकपदोत्तरं प्रयोक्तुमुचितमित्यतः 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इत्यत्र प्रमाणपदोत्तरं 'पितरो देवताः' इत्यत्र च देवतापदोत्तरमेकवचनं प्रयोक्तव्यमासीत्, समानलिङ्गकत्वाभावात्। किन्तु तस्य स्थाने बहुवचनं प्रयुक्तमित्यतिव्याप्तिः। तथा च समानलिङ्गकस्थले एव समानवचनकत्वमिति नियमस्य वक्तुमशक्यत्वात् यथा- पितरो देवताः इत्यत्र समानलिङ्गकत्वाभावेऽपि समानवचनकत्वं तथा वेदाः प्रमाणम् इत्यत्रापि असमानलिङ्गकत्वेऽपि समानवचनकत्वं युक्तं तच्च नास्तीति कथं साधुत्वमित्याक्षेपः।

**३.२. समाधानम्–** तत्र समाधानमाह– 'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्रैव समानवचनकत्वनियमः'[९] इति। अविवक्षितत्वञ्च विशेषणवाचकपदोत्तरविभक्त्या इति बोध्यम्। यथा नीलो घटः इत्यत्र विशेष्यवाचकपदं घटपदं तदुत्तरविभक्तिः सुविभक्तिः तत्तात्पर्यविषयीभूता संख्या एकत्वसंख्या तद्विरुद्धसंख्या द्वित्वादिसंख्या तस्या नीलरूपविशेषणवाचकपदोत्तरसुविभक्त्याविवक्षितत्वात् समानवचनकत्वनियमः। एवं पितरो देवताः इत्यत्र विशेष्यवाचकपितृपदोत्तरजस्विभक्तितात्पर्य-विषयीभूतबहुत्वसंख्याविरुद्धैकत्वसंख्यायाः विशेषणवाचकदेवतापदेन

अविवक्षिततया समानवचनकत्वनियमः। ईदृशनियमाङ्गीकादेव पुरूरवआद्रवसौ विश्वेदेवाः इत्यादौ पुरूरवआद्रवोरूपविशेषणपदस्य द्विवचनान्तता सङ्गच्छते। तथाहि पुरूरवआद्रवसौ विश्वेदेवाः इत्यत्र विशेष्यवाचकविश्वेदेवपदोत्तरविभक्ति-तात्पर्यविषयीभूतबहुत्वसंख्याविरुद्धद्वित्वसंख्यायाः पुरूरवआद्रवोरूपविशेषण-पदोत्तरविभक्त्या विवक्षितत्त्वान्न समानवचनकत्वम्। वेदाः प्रमाणमित्यत्रापि समानवचनकत्वाभावेऽपि न दोषः। वेदपदोत्तरजस्विभक्तितात्पर्यविषय-बहुत्वसंख्याविरुद्धैकत्वसंख्यायाः प्रमाणपदोत्तरसुविभक्त्या विवक्षितत्वान्न समानवचनकत्वम्।

**३.३. तत्र आक्षेपः परिहारश्च–** नन्वीदृशनियमाङ्गीकारे विशेष्यवाचकघटपदोत्तरविभक्तितात्पर्यविषयीभूतैकत्वसंख्याविरुद्धबहुत्वसंख्याया नीलरूपविशेषणवाचकपदोत्तरजस्विभक्त्या विवक्षितत्वे घटः नीला इति प्रयोगापत्तिरिति चेन्न सति गमके एव तादृशः प्रयोगः इति बोध्यम्। अर्थात् तादृशविवक्षायां निर्दिष्टं कारणं स्यात्। यथा पुरूरवआद्रवसौ विश्वदेवाः इत्यत्र विश्वेदेवानां बहुत्वेपि तद्विरुद्धद्वित्वसंख्याविशिष्टयोरेव पुरूरवआद्रवसोस्तत्र तत्र कर्मणि पूज्यत्वस्य प्रतिपिपादयिषितत्वात् तादृशी विवक्षा। वेदाः प्रमाणमित्यत्र चतुर्षु अपि वेदेषु एकविधं प्रमाण्यं प्रदर्शयितुं तादृशी विवक्षेति बोध्यम्।

**४. वेदाः प्रमाणमित्यत्र स्वर्थस्य क्वान्वयः?**

ननु स्वर्थः एकत्वं प्रकृत्यर्थे प्रमाणे बाधितम्, तेषां बहुत्वात्। ततश्च एकत्वस्य क्वान्वयः इति चेत् प्रकृत्यर्थतावच्छेदके अर्थात् प्रमाकरणत्वेऽन्वेति। शाब्दप्रमाकरणत्वञ्च शब्दत्वावच्छिन्नं यावच्छब्दनिष्ठमेकमेवेति नायोग्यता।





**४.१. पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधशङ्का–** ननु एकत्वस्य प्रमाकरणत्वेऽन्वयश्चेत् पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधः। घटत्वे नित्यान्वयतात्पर्येण प्रयुक्तस्य नित्यो घटः इति प्रयोगस्य निवृत्तये तस्य न्यायस्यावश्यमङ्गीकार्यत्वात्। पदजन्योपस्थितीयविशेष्यताश्रयत्वं पदार्थत्वम्। पदजन्योपस्थितीयप्रकारताश्रयत्वं पदार्थैकदेशत्वम्। प्रमाणपदाच्च प्रमाकरणत्ववत्प्रमाकरणस्योपस्थितिर्जायते। ततश्च प्रमाकरणत्वे पदजन्योपस्थितीयप्रकारताश्रयत्वस्य सत्त्वेन पदार्थैकदेशत्वात् सुपदार्थैकत्वस्य तत्रान्वयो न स्यादिति शङ्का।

**४.२. आक्षेपसमाधानम्–** तादृशी शङ्का न युज्यते, संपन्नो व्रीहिः इत्याद्यनुरोधेन व्युत्पत्तिसंकोचस्य अवश्यकत्वात्। तथाहि संपन्नो व्रीहिरिति वाक्यस्य न एकव्रीहिसंपन्नत्वे तात्पर्यं किन्तु अनेकव्रीहिसंपन्नत्वे तथापि एकवचनदर्शनेन एकत्वस्य च बहुव्रीहिषु बाधेन व्रीहित्वजातावेवान्वयः इति स्वीक्रियते अर्थात् असति बाधके पदार्थः पदार्थेनेति न्यायः प्रवर्तते। संख्यातिरिक्तस्थले अयं न्यायः प्रवर्तते इति परमार्थः। ततश्च प्रमाकरणत्वेऽन्वयेऽपि न दोषः।

**४.३. समाधानान्तरम्–** ननु गत्यभावे एव नियमसङ्कोचो युज्यते न तु सत्यपि गत्यन्तरे। पूर्वप्रदर्शितान्वयस्वीकारे नियमसङ्कोचो कर्तव्यः। किञ्च दोषोऽपि भवति। तथाहि यस्यान्वयितावच्छेदकरूपेणोपस्थितिस्तत्रैव पदार्थान्तरस्यान्वयः। यथा घटत्वेन घटस्योपस्थितिर्भवतीत्यतस्तत्र नीलपदार्थान्वयः। जातेश्च स्वरूपेण भानं भवति न तु अन्वयितावच्छेदकरूपेणेत्यतस्तत्र नान्वयः। घटत्वस्य स्वरूपेण

 ISSN 2320-2025

भानं न तु घटत्वत्वेनातस्तत्र नीलस्य नान्वयः तद्वत् व्रीहीदिपदशक्यतावच्छेदिका या व्रीहित्वजातिः सा स्वरूपेण उपतिष्ठते न तु अन्वयितावच्छेदकरूपेणेत्यतस्तत्र एकत्वस्य अन्वयः दोषाय। तर्हि कथमन्वयः इति चेदुच्यते स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन एकत्वस्य व्रीहौ अन्वयः। तथाहि स्वम् एकत्वं तदाश्रयीभूतं प्रकृत्यर्थतावच्छेदकं व्रीहित्वं तद्वत्त्वसम्बन्धेन व्रीहावन्वयः। एवं वेदाः प्रमाणमित्यत्रापि स्वम् एकत्वं तदाश्रयीभूतं प्रकृत्यर्थतावच्छेदकं प्रमाकरणत्वं तद्वत्त्वसम्बन्धेन प्रमाणे एकत्वस्यान्वयः। तथा च व्युत्पत्तिसंकोचो न कर्तव्यः इति फलितम्।

**४.४. रीत्यन्तरेण समाधानदाननिराकृतिः–** ननु संपन्नो व्रीहिः इत्यत्रैकत्वस्य व्रीहित्वजातावन्वयो भवति चेत् व्युत्पत्तिसंकोचः कर्तव्यः। विभक्त्या च न एकमेवैकत्वमुपतिष्ठते अपि तु नानैकत्वानि उपतिष्ठन्ते अनेकेषां चैकत्वानामनेकेषु व्रीहिष्वन्वये न कापि हानिरिति चेन्न। संपन्नो व्रीहिः इत्यत्र एकवचनस्यैकत्वमात्रं नार्थः तस्य संख्यारूपैकत्वस्य केवलान्वयित्वेनार्थत एव प्रतीतिसंभवात् अनुपयोगाच्च। एकत्वप्रतिपत्तेः फलमनेकव्यावृतिः। सा च एकत्वमात्रप्रतिपत्तेर्न सम्भवतीत्यतः एकत्वमिह पारिभाषिकम्। तच्च 'स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वम्'[१०]। यथा– यदा एको घटस्तिष्ठति तदैव घटोऽस्तीति प्रयोगः। स्वं घटः तत्सजातीयः वक्ष्यमाणरीत्या स एव तन्निष्ठभेदः पटभेदवान् घटः इति प्रतीतेः पटभेदः प्रतियोगितावच्छेदकं पटनिष्ठैकत्वमनवच्छेदकं घटनिष्ठैकत्वं तदेव सजातीयद्वितीयरहितत्वमेकवचनार्थः। यत्रैकत्वान्वयो विवक्षितस्तत्र



 ISSN 2320-2025

स्वसजातीयद्वितीयरहितत्वमेवैकत्वं विभक्तिप्रतिपाद्यम् इति फलितम्। सम्पन्नो व्रीहीरित्यत्र स्वपदग्राह्यव्रीहिसजातीयव्रीह्यन्तरनिष्ठभेदप्रतियोगितावच्छेदकं विभक्तिप्रतिपाद्यम् एकत्वं न सजातीयद्वितीयरहितत्वरूपम्। अतः एकत्वस्य व्रीहावन्वयो न स्यात्। अतः तद्रीत्या दोषवारणं न युज्यते। किञ्च विशिष्टैकत्वस्यैकवचनार्थत्वादेव 'पशुना यजेत' इत्यादौ पशुनिष्ठस्य सजातीयद्वितीयरहितत्वरूपैकत्वस्य विवक्षिततया एकपशुकरणकयागादेवादृष्टसिद्धिर्भवति न त्वनेकपशुकरणकयागादपि। अन्यथा एकवचनोपस्थितानि नानैकत्वानि अनेकपशुषु अन्वयं प्राप्नुयुस्ततश्च अनेकपशुकरणकयागादपि अदृष्टसिद्ध्यापत्तिः।

तत्र स्वसजातीयत्वं स्ववृत्तिधर्मवत्त्वम्। तत्र स्वं घटादिः तद्वृत्तिर्धर्मः क इति जिज्ञासायामाह भट्टाचार्यः–'साजात्यञ्च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट-प्रकृत्यर्थतावच्छेदकवत्त्वरूपेण'[११] इति। यथा अत्र घटोऽस्तीत्यत्र स्वं प्रकृत्यर्थो घटादिस्तत्समभिव्याहृतं पदमत्रपदं तदर्थः एतद्देशवृतित्वं तत्संसर्गः स्वरूपसम्बन्धः संसर्गित्वं घटे सामानाधिकरण्यसम्बन्धेन तत्संसर्गित्वविशिष्टं यत्प्रकृत्यर्थतावच्छेदकं घटत्वं तद्वत्त्वरूपेणेति समन्वयः। एतादृशसाजात्यविवक्षणादेव अत्र घटोऽस्ति इत्यादौ घटानामनेकत्वेन परस्परं भेदाच्च अयं घटस्तद्घटनिष्ठैकत्ववान्न इति प्रतीत्या एकत्ववद्घटनिष्ठा या भेदप्रतियोगिता तदवच्छेदकमेवैकत्ववद्घटनिष्ठमेकत्वं जातं न त्वनवच्छेदकमिति रीत्या भेदप्रतियोगितानवच्छेदकैकत्वस्याप्रसिद्धावपि न क्षतिः यतः अत्रपदेन एतद्देशवृत्तित्वमुपस्थाप्यते। ततश्च एतद्देशवृत्तिघटसजातीयः एतद्देशवृत्तिघटः

तन्निष्ठभेदः पटभेदः तत्प्रतियोगितावच्छेदकं पटनिष्ठैकत्वं तदनवच्छेदकमेतद्देशवृत्तिघटनिष्ठैकत्वमिति एतद्देशवृत्तिघटनिष्ठभेदप्रतियोगिता-नवच्छेदकैकत्वस्य अत्र घटोऽस्तीत्यत्र बोधादिति तस्य च प्रसिद्धत्वान्नाप्रसिद्धत्वरूपपूर्वोक्तदोषः। एतद्देशे बहुघटसत्त्वदशायाम् अत्र घटोऽस्तीति वाक्यप्रयोगे तु एकत्वस्य जातावेवन्वयो वक्तव्यः।

**४.५. उपायान्तरेण समाधानप्रदर्शनं तन्निराकरणञ्च**– आख्यातार्थसंख्यायाः प्रथमान्तार्थेऽन्वयस्वीकारेण आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यता-सम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलति। तथा च 'देवदत्तः पचति', 'तण्डुलः पच्यते' इत्यादौ देवदत्ततण्डुलादिप्रथमान्तपदसत्त्वेन तत्र देवदत्ततण्डुलादावाख्यातार्थसंख्याया अन्वयेन सार्थक्येऽपि 'पच्यते देवदत्तेन' इत्यादिभावाख्यातस्थले प्रथमान्तपदाभावेनाख्यातार्थसंख्यायाः क्वचिदप्यन्वयासम्भवात्सार्थक्यं न भवतीत्यतस्तत्र संख्याया अविवक्षा क्रियते। यथा भावाख्यातस्थले संख्याया अविवक्षायामप्येकवचनस्य साधुत्वमुररीक्रियते तथा 'सम्पन्नो व्रीहिः' इत्यत्रापि संख्याया अविवक्षायामप्येकवचनस्य साधुत्वं स्यात्, किमर्थं सोरर्थं प्रकल्प्य तस्य च व्रीहित्वजातौ अन्वयस्वीकाररूपगौरवमाश्रीयत इत्याक्षेपः। उपायान्तरविरहे सति भावाख्यातस्थलवत् विभक्तेर्निरर्थकत्वाभ्युपगमो युज्यते न तु सत्यप्युपायान्तरे। अत्र हि एकत्वस्य व्रीहित्वजातावन्वयाभ्युपगमेन सार्थक्यसम्भवे निरर्थकत्वकल्पनमनुचितम्। किञ्च वक्तुः संख्यायां तात्पर्ये सति संख्याबोधोऽपि जायते एवेति सर्वजनानुभवसिद्धत्वादिति सोर्निरर्थकत्वकल्पनं निर्युक्तिकमेवेति





मन्तव्यम्।

**५. उपसंहृतिः**

एवं नीलो घटः इत्यादावभेदभानाय घटादिपदनिष्ठशक्ति-कल्पकानामन्विताभिधानवादिनां मतं निरस्तं भवति। तत्राभेदः प्रातिपदिकपदार्थानुयोगिकः स्वसमानविभक्तिकस्वाव्यवहितपूर्वान्यतर-पदोपस्थाप्यार्थप्रतियोगिकः संसर्गमर्यादया भासते इति नियमः। किञ्च विभक्तिविभाजकप्रथमात्वादिना साजात्याङ्गीकारात् वेदाः प्रमाणमित्यत्र सुत्वजस्त्वरूपानुपूर्वीवैपरीत्येऽपि न दोषः। 'विंशत्याद्याः सदैकत्वे' इत्यादिविशेषानुशासनाभावेऽपि 'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य-विषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्रैव समानवचनकत्वनियमः' इत्यङ्गीकारात्सिद्धं वेदाः प्रमाणमित्यस्य साधुत्वम्। एतादृशनियमस्वीकारेण 'इति त्रयः समुदिता हेतुः' इति काव्यप्रकाशोक्तव्याख्यानं सुष्ठु सङ्गच्छते। तथाहि– विशेष्यवाचकत्रिपदोत्तरजस्विभक्तितात्पर्यविषयबहुत्वसंख्याविरुद्धैकत्वसंख्याया विशेषणवाचकहेतुपदोत्तरसुविभक्त्या विवक्षितत्वात्समानवचनकत्वाभावेऽप्यदोषः। दण्डचक्रचीवरन्यायेन शक्तिनिपुणताभ्यासानां समुदाये एव कार्यनिष्ठप्रयोजकता विद्यते इति प्रतिपादनाय तादृशी विवक्षा। एतेन तृणारणिमणिन्यायेन हेतुत्वशङ्का निराकृता, अन्यथा केवलतृणसमवधाने यथा वह्न्युत्पत्तिस्तथा केवलशक्तिसमवधानेऽपि काव्योत्पत्त्यापत्तिः स्यात्। इत्थञ्च वेदाः प्रमाणमिति वाक्यं साध्वेवेति नान्यथासिद्धिरतिपल्लवितेनेति शिवम्।

॥श्रीरामकृष्णार्पणमस्तु॥

**तथ्यसूत्राणि–**

१. *व्युत्पत्तिवादः*(आदर्शटीकोपेतः), पृ.- १।

२. तत्रैव, पृ.- ४।

३. तत्रैव, पृ.- ४।

४. तत्रैव, पृ.- ४।

५. तत्रैव, पृ.- १६।

६. *अमरकोषः*, श्लोकसंख्या- २.९.१३४०।

७. *काव्यप्रकाशः*(नागेश्वरीटीकोपेतः), पृ.- ४।

८. तत्रैव, पृ.- ४।

९. *व्युत्पत्तिवादः*, पृ.- ७।

१०. तत्रैव, पृ.- १०।

११. तत्रैव, पृ.- ११।

**परिशीलितग्रन्थाः–**

१) भट्टाचार्यः, गदाधरः, *व्युत्पत्तिवादः* (आदर्शटीकोपेतः), सम्पा.- हरेरामत्रिपाठी, २०११, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

२) भट्टाचार्यः, गदाधरः, *व्युत्पत्तिवादः* (जयाटीकोपेतः), सम्पा.-श्रीमदुमेशमिश्रः, १९८८, वाणीविलासप्रकाशन, वाराणसी।

३) भट्टाचार्यः, गदाधरः, *व्युत्पत्तिवादः* (दीपिकाटीकोपेतः), सम्पा.- ज्वालाप्रसादगौडः, २०१०, चौखम्बा-सुरभारती-प्रकाशन, वाराणसी।

४) भट्टाचार्यः, गदाधरः, *व्युत्पत्तिवादः* (इन्दुकलाख्यहिन्दीटीकोपेतः), व्याख्याकारः- डॉ वैद्यनाथझा, २०११, हंसाप्रकाशन, जयपुर।

५) भट्टाचार्यः, गदाधरः, *व्युत्पत्तिवादः* (विद्वन्मनोरमाख्यव्याख्योपेतः), सम्पा.- हरेकृष्णशतपथी, २०११, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

६) मम्मटः, *काव्यप्रकाशः* (नागेश्वरीटीकोपेतः), सम्पा.- श्रीहरिशङ्करशर्मा, २००७, चौखम्भाप्रकाशन, वाराणसी।





# काव्यादर्शे श्लोकादर्शसन्दर्भः

**डॉ.राधावल्लभशर्मा,**
**सहायकाचार्यः, साहित्यविभागे,**
**हरियाणासंस्कृतविद्यापीठम्(नवदेहलीस्थकेन्द्रीय-**
**संस्कृतविश्वविद्यालयेन सम्बद्धम्)बघौला, पलवलम्, हरियाणा**
ई-मेल-drrvshastri@gmail.com
Ph. no.-9805072781

भारतीयकाव्यशास्त्रपरम्परा नैरन्तर्येण गतिमती विचारवती च वर्तते इत्यत्रास्माकमाचार्याणां शास्त्रचिन्तनतत्पराणां मतिमतां भूयान्प्रयास एव मौलिभूतं हेतुरिति मनागपि न शङ्काकलङ्कः। परम्परायामेवास्यां कविशिरोमणिः करतलामलकीकृतालङ्कारशास्त्रः साहित्यार्थसुधासिन्धुर्दण्डी स्वसिद्धान्तपरामर्शेन विषयप्रस्तुतीकरणेनात्युत्कटकवित्वशक्त्या च सुतरां सुप्रसिद्ध इति तदीयरचनासम्पत्प्रमाणीकरोति। कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः वचनमदो वार्तामिमामुपर्युक्तामितोऽपि प्रबलीकरोति।

काव्यशास्त्रिणामादर्शभूतः काव्यादर्शो नामधेयो ग्रन्थो विद्वत्सु प्रसिद्धः प्रथितश्चेत्यत्र महाकविदण्डिन एव उद्योगयोगः। अयञ्च काव्यादर्श अलङ्कारशास्त्रे प्रविविक्षतां कृते अतीवोपकारकः सरसमधुरया शैल्याऽलङ्कारशास्त्रीयतत्त्वनिवहप्रकाशश्चेति न तिरोहितं सुधियाम्। ग्रन्थेऽस्मिन् त्रयो विमर्शा विलसन्ति। प्रथमे विमर्शे तावद् गद्यस्वरूप-तद्भेदाः गुणस्वरूप-तद्भेदाश्च सुष्ठुरीत्या वर्णिताः। द्वितीये विमर्शे उपमादीनामलङ्काराणां विस्तरेण व्याख्यानमकारि। तृतीये च विमर्शे यमकमहायमकगोमूत्रिकासर्वतोभद्रप्रहेलिकाभेदकाव्यदोषाणाञ्च वर्णनं व्यधायि। काव्यादर्शेऽस्मिन् श्लोकसौन्दर्यमतितरां विच्छित्तिं धारयद् दण्डिप्रातिभं वैशद्येन चमत्करोति सहृदयसभ्यान्। अत्र श्लोको नाम अनुष्टुब्छन्दः। अवादि ध्वनिकारेण—

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**[1]

महाकविना कालिदासेनापि किञ्चिदित्थमेव व्याख्यायि—

**निषादविद्धाण्डजदर्शनोत्थ श्लोकत्वमापद्यत यस्य शोकः।**[2]

अनुष्टुब्छन्दसि कविना दण्डिना या चारुता प्रकटिता सा नितान्तं हृदयहारिणी, चेतःप्रसादिका, अभिनवभङ्गीनिवेशपेशलताशालिनी च वर्तते। तस्मादुच्यते-

**विना व्याकरणेनान्धो बधिरः कोशवर्जितः।**

**छन्दःशास्त्रं विना पङ्गुर्मुकस्तर्कविवर्जितः॥**[3]

अस्मिन्नेव सन्दर्भे पण्डितेन्द्रेण क्षेमेन्द्रेण किञ्चिदिदमवादि-

**अनुष्टप्छन्दसां भेदे कैश्चित्सामान्यलक्षणम्।**

**यदुक्तं पञ्चमं कुर्याल्लघु षष्ठं तथा गुरु॥**[4]

इह श्लोकनिबद्धानि कानिचन पद्यानि स्फुटीक्रियन्ते क्रमशः। मङ्गलाचरणे परम्परितरूपकमाश्रित्य रमणीयो भावः प्रकटितः। तद्यथा—

**चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।**

**मानसे रमता नित्यं सर्वशुक्ला सरस्वती॥**[5]

अत्र श्लोकमुखेनायमर्थः सङ्गतो भवति यद् हंसी हि कमलवनवासरसिका, अतः शारदाया हंसीत्वेन रूपणे ब्रह्ममुखानां कमलत्वेन रूपणमावश्यकम्। यथा- काचिद् हंसी कमलवने विहरति तथा ब्रह्मणो मुखेषु स्वच्छन्दविहारिणीयं वाणीति। सर्वशुक्ला इत्यनेन नितान्तनिर्दोषा इत्युक्तम्। अत्रानुष्टब्छन्दसश्चमत्कारः सर्वानतिशेते। यथा सकलदोषरहिता वेदरूपा सरस्वती हिरण्यगर्भमुखाम्बोजवासिनी तथा मम मानसे वर्तमाना सरस्वत्यपि शुद्धैव, न तु हालिकादिसाधारणजनमुखे विद्यमाना च्युतसंस्कृत्यादिदोषोपेतेति फलितार्थः। अत्र भगवन्मूर्तिभूतायां सरस्वत्यां कविनिष्ठो रतिभावो व्यङ्ग्यः। अस्मिन् अनादिविविधविचित्ररचनाप्रपञ्चचारुतरे संसारे त्रिविधा वाच उपलभ्यन्ते— संस्कृताः, प्राकृताः देश्यश्च। तत्राद्या पाणिन्यादिभिरनुशिष्टा, द्वितीया वररुचिना कृतानुशासना, शिष्टा च वर्तते देवी वाक्। अत्र शिष्टानाम् अर्थात् पाणिन्यादिभिः व्युत्पादितानाम्, अनुशिष्टानाम् अर्थात् प्रकृतिप्रत्ययविभागादिभिः





साधितानाम्, सर्वथा शिष्टानाम् अर्थात् केनापि प्रकारेण अनुशासनं न प्राप्तानां संस्कृतप्राकृतभिन्नानां देशभाषाणां वाचामनुग्रहेण प्राणिनां यात्राव्यवहारः प्रचलतीति। अत्र दण्डिनः तात्पर्यं भाषाव्यवहारेण वर्तते। एतादृशं गभीरं वर्णनमस्मिन् छन्दसि कृत्वा काव्यादर्शकारः स्वप्रतिभापाटवं सुष्ठुतया प्रस्तौति।

वस्तुतः कवयो भवन्ति वाण्युपासकाः। वाणीं विना काव्यसंसारो मृतायते। एतदेवाभिलक्ष्य सत्यमेव लक्षयामास कविबन्धुना सुबन्धुना—

**करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः।**

**पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी॥**[6]

शब्दस्वरूपं विवेचयता दण्डिना तथ्यमिदमित्थमभाणि—

**इदमन्धन्तमःकृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**[7]

शब्दानां व्यवहारसाधनत्वमिह व्यतिरेकमुखेन प्रत्यपादि ग्रन्थकारेण। **आसंसारं न दीप्यते** इत्यत्र आङ् इत्यस्याभिव्यापकार्थे प्रयोगं विधाय काचिदपूर्वा विच्छित्तिः समुपस्थायि कविना। शब्दानां सुप्रयोगः कवित्वनिकषभूतः। यदि स्वरमात्रासन्दर्भसङ्केतादीनां दोषः कुत्रचित् स्यात्तर्हि कवित्वं संशयास्पदमेव भविता। अमुमेव भावमित्थं प्रास्तौत्—

**गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः।**

**दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥**[8]

पद्यस्यास्यान्वयो विशिष्टरीत्या समपादि ग्रन्थकारेण। तद्यथा- सम्यक् प्रयुक्ता गौः बुधैः कामदुघा स्मर्यते. सैव गौः दुष्प्रयुक्ता सती प्रयोक्तुः गोत्वं शंसति। **गौर्गौः** इत्यत्र चमत्कारातिशयः द्योत्यते। दोषाणां सर्वथा परित्याग आवश्यकः काव्ये। वस्तुतो निर्दोषां सगुणानां सरसां सालङ्कारां वाचं प्रयुञ्जानः कविः श्लाघ्यो भवति तदन्यो निन्द्यते लोकैः सर्वथा, तस्मात् अदोषवत्त्वादिधर्मोपेतायां वाचि यतितव्यम्, तादृशी वागेव च काव्यमिति। यथा शरीरे कचनाङ्गभेदेऽवस्थितेन श्वेतकुष्ठेन सुन्दरमपि

शरीरं सौभाग्यहीनं जायते तद्वत् स्वल्पेन क्वचन पदांशे स्थितेन दोषेण काव्यमेव सकलमुपहसनीयं भवतीति वक्ति—

**तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।**

**स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥** [9]

पद्येऽस्मिन् **श्वित्रेण** शब्दस्यास्य काचिदपूर्वा शोभाऽत्र कविना वर्णिता। दृष्टान्तालङ्कारस्येदं मनोरममुदाहरणम्। महाभाष्ये जगाद भगवान् पतञ्जलिः-

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद् व्यवहारकाले।**

**सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।** [10]

साहित्यशास्त्रप्रयोजनमुत्तमरीत्या दृष्टान्तमुखेन च वर्णयता कविना गुणदोषविभागक्षमो जनः तदेव भवति यदा स साहित्यशास्त्रवित् स्यादिति। तदेव प्रोच्यते—

**गुणदोषानशास्त्रज्ञः कथं विभजते जनः।**

**किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु॥** [11]

प्रश्नशैल्या सर्वमप्येदमुपस्थापि ग्रन्थकर्त्रा।

व्यवहारज्ञानं काव्यरचनया सम्भवतीति निश्चप्रचम्। अतो व्यवहारज्ञानाय पूर्वसूरिभिर्निर्माणपद्धतिः विरचिता। साभिमानेनात्र प्रदर्श्यते भावोऽयम्—

**अतः पदानां व्युत्पत्तिमभिसन्धाय सूरयः।**

**वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्॥** [12]

अत्र सूरयो निबबन्धुरिति तदुक्तीनामप्रमादसम्भावना, तया च तदनुसारिणो ममाप्युक्तेः सारवत्त्वमिति ध्वन्यते।

तर्हि का सा क्रियाविधिः इति जिज्ञासा जाते सति काव्यमेव क्रियाविधिर्भवति। अस्य काव्यस्य स्वरूपमित्थं प्रतिपाद्यते—





**तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः।**

**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥** [13]

इष्टार्थः पदसमुदयं काव्यमिति। इष्टार्थयुतं पदमेव काव्यशरीराय न पर्याप्तमपि तु तेषां पदानां साकाङ्क्षत्वयोग्यत्वासत्तित्वञ्चापेक्षितमिति। इष्टार्थत्वञ्चात्र चमत्कृतियुक्तत्वमभिप्रेतम्। चमत्कारश्च लोकोत्तराह्लादः, आह्लादगतं लोकोत्तरत्वं च कविप्रतिभयोपस्थापितेनालौकिकसामग्रीविशेषेण सम्पादितः सुखत्वव्याप्योऽनुभवसाक्षिको जातिविशेषः। तादृशाह्लादं प्रति शब्दार्थानां हेतुत्वं व्यङ्ग्यविशेषद्वारेण दोषाभावोपस्कृतगुणालङ्कारकृतसौन्दर्येण च निष्पन्नं भवतीति। लोचनकारेणापि स्पष्टमवादि— कवनीयं काव्यमिति। कौति शब्दायते विमृशति रसभावानिति कविः तस्य कर्म काव्यमिति भट्टगोपालस्याभिप्रायः। गद्यस्वरूपमित्थमुवाच—अपादः पदसन्तानो गद्यम्। व्याख्यायति— पादो गणमात्रानियमितः पद्यतुरीयांशः तद्भिन्नोऽपादो गणमात्रानियमवर्जित इत्यर्थः।

समतागुणस्योदाहरणेष्वनुष्टुप्छटा नैसर्गिकी रसावहा स्फुटा च वर्तत इति। तस्मादुरीक्रियते क्षेमेन्द्रेण देशिकेन्द्रेण-

**आरम्भे सर्गबन्धस्य कथाविस्तरसंग्रहे।**

**शमोपदेशवृत्तान्ते सन्तः शंसत्यनुष्टुभम्॥** [14]

उदाहरणं यथा—

**कोकिलाऽऽलापवाचालो मामैति मलयानिलः।** [15]

अत्र मृदुबन्धेन प्रारब्धस्य सन्दर्भस्य तेनैव बन्धेन समापनम्।

**उच्छलच्छीकराच्छाच्छनिर्झराम्भः कणोक्षितः।**

**चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः॥** [16]

अत्र प्रथमे तावद् विकटात्मकस्फुटबन्धेनोपक्रान्तस्य सन्दर्भस्य तेनैव समापनात्स्फुटबन्धविषया समतेति। द्वितीये तावत् प्रारम्भे स्फुटो बन्धश्चरमे च मृदुरिति मिश्रबन्धता विलोक्यते।

माधुर्यगुणलक्षणप्रसङ्गेऽपि श्लोकसौन्दर्यमतितरां शोभां पुष्णातीति प्रमाणत्वेनात्रोदाहरणं प्रस्तूयते—

**मधुरं रसवद् वाचि वस्तुन्यपि रसस्थितिः।**

**येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥**[17]

रसवद्वाक्यं मधुरमिति व्यवहारः। एतेन रसो माधुर्यमिति तयोरभेदः पर्यवस्यति। माधुर्यं नाम गुणः, गुणास्तावच्छब्दार्थनिष्ठतया साक्षात् परम्परया वा रसोपकारका भवन्ति।, न तु रसाभिन्नता गुणानां तत्कथमत्र माधुर्यस्य रसात्मकत्वमित्युच्यत? अस्येदं समाधानम्, वाचि शब्दे वस्तुनि अर्थे चापि रसस्थितिः व्यञ्जकतया सम्बन्धो भवति। अस्योदाहरणमप्यत्र चारुतया प्रदर्शितम्। अत्रोदाहरणे शब्दानां मसृणत्वमविकटाक्षरबन्धत्वञ्च सुतरां प्रभावशालि आकर्षकञ्चेति।

पदगतवृत्त्यनुप्रासमुदाहरता कथयति कविरत्रेत्थम्—

**चारु चान्द्रमसं भीरु बिम्बं पश्यैतदम्बरे।**

**मन्मनो मन्मथाकान्तं निर्दयं हन्तुमुद्यतम्॥**[18]

कस्यचित्कामुकस्य कुपितां नायिकां प्रत्युक्तिरियम्। अत्र प्रथमे पादे चा,रु वर्णयोरावृत्त्या वृत्त्यनुप्रासः। द्वितीये च पादे मकारवकारयोरावृत्तिरिति। अस्मिन्नेवानुप्रासे विसर्गबाहुल्याद् बन्धपारुष्यहेतुत्वाच्च दोषो जायते कुत्रचित्। **अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ** इत्यनेन नयेन कुत्रचिच्चानुप्रासोऽयं न संभाव्यते। अनुप्रासस्य चमत्कारो विजातीयपुष्पसङ्कीर्णपुष्पमालेव भवतीति निष्कर्षः।

ओजगुणस्योदाहरणमित्थं प्रस्तौति कविर्दण्डी—

**अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा।**

**पीनस्तनस्थिताताम्रकम्रवस्त्रेण वारुणी॥**[19]





पश्चिमाशाया मनोरमं वर्णनमिदम्। सन्ध्यासमये भास्करस्य रक्ताभाः किरणाः पश्चिमाचलशिखरे प्रसरन्ति, इत्थं मन्ये वारुणी दिशा नायिका पीनस्तनभागे रक्तं वस्त्रमिव धारयतीति। ओजगुणस्य प्रभावोत्पादकं वर्णनमनुष्टब्छन्दसा विहितमत्र कविना नैपुण्येन।

उपमालङ्कारप्रसङ्गे उपमावाचकशब्दानां प्रयोगविषये महाकविना दण्डिना काचिदपूर्वा चातुरी प्रकटिता। चिन्तनमिदं सर्वथा मौलिकमभिनवञ्च वर्तत इति बुधबुद्धिः। यथा—

**इववद्वायथाशब्दाः समाननिभसन्निभाः।**

**तुल्यसङ्काशनीकाशप्रकाशप्रतिरूपकाः॥**

**प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः।**

**सदृक्सदृशसंवादिसजातीयानुवादिनः॥**

**प्रतिबिम्बप्रतिच्छन्दसरूपसमसम्मिताः।**

**सलक्षणसदृक्षाभसपक्षोपमितोपमाः॥**

**कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधी अपि।**

**सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः॥**

**समासश्च बहुव्रीहिः शशाङ्कवदनादिषु।**

**स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति॥**

**आक्रोशत्यवजानाति कदर्थयति निन्दति।**

**विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति॥**

**तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति।**

**तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति॥**

**तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते।**

**तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति॥**

**तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः।**

**उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥**[20]

अभिधालक्षणाव्यञ्जनाभिः अमी सादृश्यसूचकाः शब्दाः प्रकाशिता भवन्ति। एतेषु इव, वत यथादयः शब्दा अभिधया सादृश्यं बोधयन्ति, तुल्यादिशब्दाः सादृश्यविशिष्टेषु शक्ता भवन्ति अत एवार्थसादृश्यस्य प्रतीतिः एभिर्जायते। असूयतिनिषेधत्यादिशब्दाः सादृश्यस्य लक्षका, अनुकरोत्यादयः सादृश्यस्य व्यञ्जका सन्तीति विशेषः। इव, वत, वा, यथा, समान, निभ, सन्निभ, तुल्य, संकाश, नीकाश, प्रकाश, प्रतिरूपक, प्रतिपक्ष, प्रतिद्वन्द्वि, प्रत्यनीक, विरोधिन, सदृक, सदृश, संवादी, सजातीय, अनुवादी, प्रतिबिम्ब, प्रतिच्छन्द, सरूप, संमित, सम, सलक्षण, सदृक्ष,आभा, सपक्ष, उपमित, उपमा, कल्पप्रत्ययः, देश्यप्रत्ययः देशीय, प्रख्य, प्रतिनिधि, सवर्ण, तुलित, अन्यून, अनून, अहीन, बहुव्रीहिसमासः, कर्मधारयसमासः ,स्पर्धते, जयति, द्वेष्टि, द्रुह्यति, प्रतिगर्जति, आक्रोशति, अवजानाति, कदर्थयति, निन्दति, आडम्बयति, सन्धत्ते, हसति, ईर्ष्यति, असूयति, मुष्णाति, विलुम्पति, विगृह्णाति, अधिरोहति, धत्ते, विगाहते, तमन्वेति, तमनुबध्नाति, तच्छीलम्, तन्निषेधति, तस्यानुकरोतीत्यादयः शब्दाः सादृश्यवाचकाः। वैयाकरणसिद्धान्ते इवाद्याः शब्दा उपमायाः द्योतका एव सन्ति न वाचका निपातत्वादुपसर्गवत्। प्रोक्तञ्च भूषणे—

**द्योतकाः प्राद्यो येन निपाताश्चादयस्तथा।**

**उपास्येते हरिहरौ लकारो दृश्यते यथा ॥**[21]

तथाप्यालङ्कारिकाणां सिद्धान्ते इवादीनां वाचकत्वमेव। तद्बीजन्तु केषाञ्चिद्वैयाकरणानां मते क्वचिदेतेषां वाचकत्वमपि। तदुक्तञ्च हरिणा—

**निपाता द्योतकाः केचित्पृथगर्थाभिधायिनः।**

**आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः ॥**[22]

अहो कवेरप्रतिमं पाण्डित्यम्। गभीरं तलस्पर्शिवैदुष्यञ्चात्र पदे पदे संलक्ष्यते काव्यादर्शकारस्य। सविशेषणरूपकस्योदाहरणत्वेनायं श्लोकः समुदाहृतः—

**हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः।**





**जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः ॥**[23]

अत्रानुष्टब्शोभा सार्थवती संभूता। गङ्गाया विष्णोः पादात्प्रसूतेर्धावल्याच्च ध्वजपटत्वारोप इति। अत्र शिरोलग्नेति विशेषणेन समग्रस्य युक्तस्य केतोः यदीदृशं रूपं सपताकध्वजरूपं भगवतश्चरणे तस्य सपताकध्वजस्य समर्पणात् विशेषणविशिष्टस्य पदार्थस्यारोपात् सविशेषणरूपकमेतत्। व्यतिरेकरूपकमित्थमुदाहरति—

**चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः।**

**असमग्रोऽप्यसौ शश्वदयमापूर्णमण्डलः ॥**[24]

अत्र गौणमुख्यचन्द्रमसोः मुखविध्वोः सम्पूर्णमण्डलत्वासम्पूर्णमण्डलत्वाभ्यां वैधर्म्ययोगाद् व्यतिरेकरूपकमिदम्। सुरैः असम्पूर्णमण्डलोऽपि **असौ चन्द्रमाः सर्वदा पीयते** अर्थात् अयं चन्द्रः कदाचिद् वर्धते कदाचिच्चापक्षीयते। **चन्द्रमाः पीयते** इत्यनेन सुधारसपानमत्र व्यज्यते। त्वन्मुखचन्द्रमास्तु पूर्णबिम्बो भवति। अभेदप्रतीतिपूर्वकभेदपर्यवसानं यत्र भवति तत्रायमलङ्कारः।

शब्दार्थयोरप्रतिमं सौन्दर्यं प्रत्याख्याति दण्डिनः प्रतिभापाटवमनुष्टब्वृत्तनिबद्धेनानेन पद्येन। क्रियादीपकं यथा—

**मन्दो गन्धवहः क्षारो वह्निरिन्दुश्च जायते।**

**चर्चाचन्दनपातश्च शस्त्रपातः प्रवासिनाम् ॥**[25]

अत्र सर्ववाक्यान्वयिनः **जायते** इति क्रियापदस्य मध्यगतत्वान्मध्यगतं क्रियादीपकमिदम्। श्लोकरमणीयतात्र गरीयसी। एतदेवाभिलक्ष्य महाकविक्षेमेन्द्रः प्रत्यपीपददिदमित्थम्—

**पुराणप्रतिम्बेषु प्रसन्नोपायवर्त्मसु।**

**उपदेशप्रधानेषु कुर्यात्सर्वेष्वनुष्टुभम् ॥**

**नानावृत्तविशेषास्तु कवेः शस्तस्य शासनात्।**

**यान्ति प्रभोरिवात्यन्तमयोग्या अपि योग्यताम् ॥**[26]

आशीर्वचनाक्षेपस्योदाहरणं यथा—

**गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।**

**ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥**[27]

कीदृशीयं चारुता पद्यस्यास्य यद्बलाद् मनोऽत्रैव रमते। त्वयि गते मम त्वदायत्तजीविताया मरणमवश्यम्भावि, मरणात्परतश्च पुनर्जन्मप्रसङ्गे यत्र भवदास्थितिस्तत्रैव जन्मशासे, येन भवद्दर्शन-जन्या तृप्तिरासाद्यतेति भावार्थः।

भाग्यस्यानुल्लङ्घनीयत्वं विश्वव्यापि भवतीति अर्थान्तरन्यासमुखेनेत्थं ब्रूते—

**भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि।**

**पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते॥**[28]

भाग्यस्यातिक्रमणं केनापि कर्तुं न पार्यते। समर्थकार्थस्य विश्वव्यापित्वादयमर्थान्तरन्यास इति।

**पयोमुचः परीतापं हरन्त्येव शरीरिणाम्।**

**नन्वात्मलाभो महतां परदुःखोपशान्तये॥**[29]

अत्राप्यर्थान्तरन्यासरामणीयकमतिशयेन व्यज्यते।

विभावनाया उदाहरणे श्लोकचमत्कारो भूयान् दृश्यते। तद्यथा—

**अनञ्जितासिता दृष्टिर्भ्रूरनावर्जिता नता।**

**अरञ्जितोरुणश्चायमधरस्तव सुन्दरि॥**[30]

हे सुन्दरि! तव दृष्टिः अनाकलितकज्जला अपि श्यामा वर्तते। तव भ्रूः अनाकृष्टा अपि वक्रीभूता वर्तते, तवायमधरः रञ्जनद्रव्येणारक्तीकृतोऽपि रक्तकान्तिः विद्यते। अत्रासितत्वनतत्वारुणत्वरूपाणि कार्याणि अञ्जनावर्जनरञ्जनस्वरूपैः प्रसिद्धैः हेतुभिर्विना दर्शितानि स्वाभाविकत्वं व्यञ्जयन्ति।

अतिशयोक्त्यलङ्कारमित्थमुदाहरति ग्रन्थकारो दण्डी—





**मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः।**

**क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः॥**[31]

अत्र ज्योत्स्नायाः श्वेतत्वं मल्लिकापुष्पाद्यभिन्नतया वर्ण्यमानं समधिकश्वेततया प्रतीयते इत्यति-शयोक्तिः। अत्र चन्द्रिकाया वर्णनमेवाभीष्टम्, चन्द्रिकाया श्वेतत्वं मल्लिकाकुसुमचन्दनादीनां श्वेताभया सह मिलतीति कृत्वा चन्द्रिकाया एव प्रशंसाऽत्र विहिता वर्तते।

हेतुरलङ्कारस्यास्मिनुदाहरणे श्लोकमसृणत्वं प्रसादगुणवेष्टितं हृदयावर्जकं प्रीतिकरञ्च वर्तत इत्युदारणं प्रदर्श्यते—

**अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः।**

**उत्पादयति सर्वस्य प्रीतिं मलयमारुतः॥**[32]

**गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।**[33]

उदाहरणेऽस्मिन् ज्ञापकहेतुरलङ्कारो विद्यते। इहापि श्लोकरमणीयता लोकोत्तराह्लादजनक-ज्ञानगोचरतेति। अस्फुटो वाक्यविन्यासः, सुललिता, मधुरिमा, वर्णसंयोजनञ्चामीषां पद्यानां सातिशयं वैशिष्ट्यमिति।

इतोऽपि द्वित्राण्युदाहरणानि दीयन्ते-

**अनभ्यासेन विद्यानामसंसर्गेण धीमताम्।**

**अनिग्रहेण चाक्षाणां जायते व्यसनं नृणाम्॥**[34]

अत्र विद्याभ्यासादीनां प्राग्भावो व्यसनोत्पत्तिं प्रति हेतुरिति प्राग्भावरूपो हेत्वलङ्कारः। इह कपाले घटो भविष्यति, इह तन्तुषु पटो भविष्यतीति प्रत्ययसाक्षिकः उत्पत्तेः पूर्वं कार्यस्याभावो यः स प्राग्भावः।

**गतः कामकथोन्मादो गलितो यौवनज्वरः।**

**क्षतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः॥**[35]

अत्र कामकथादीनां पूर्वोत्पन्नानां ध्वंसाभावः पुण्याश्रमगमनं प्रति हेतुरिति। ध्वंसाभावरूपो हेत्वलङ्कारोऽत्र।

**वनान्यमूनि न गृहाण्येता नद्यो न योषितः।**

**मृगा इमे न दायादास्तम्भे नन्दति मानसम्॥**[36]

अत्र **अमूनि वनानि** स्वेष्टाशनादिविहराण्यपि न गृहाणि अर्थाद्दुःखातिरेकप्रदातृगृहभिन्नानि इत्येवमादिरूपेण वनगृहादीनामन्योन्याभावो मानसनन्दनं प्रति हेतुरिति अन्योन्याभावरूपो हेत्वलङ्कारः।

**अत्यन्तमसदार्याणामनालोचितचेष्टितम्।**

**अतस्तेषां विवर्धन्ते सततं सर्वसम्पदः॥**[37]

अत्र अविमृश्यकारिताया अत्यन्ताभावः सर्वसम्पत्तिवृद्धिं प्रति हेतुरिति अत्यन्ताभावरूपो हेत्वलङ्कारः।

**उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।**

**देयः पथिकनारीणां सतिलः सलिलाञ्जलिः॥**[38]

अत्र चूतमञ्जरीणामुद्भेदाभावस्याभावो विरहिणीनां मरणहेतुत्वेनोपनिबद्ध इत्यभावाभावरूपो हेत्वलङ्कारः।

काव्यादर्शस्य तृतीयपरिच्छेदे यमकालङ्कारस्य साङ्गोपाङ्गवर्णनमकारि कविनेह। यमकालङ्कार-निरूपणे महाकविदण्डिनः कारयित्री भावयित्री च प्रतिभा दृश्येते। यमकालङ्कारस्याहत्य पञ्चदशा-धिकत्रिशतानि भेदा भवन्ति।

पादचतुष्टयगतमव्यपेतमादिभागयमकमुदाहरतीत्थम्—

**रमणी रमणीया मे पाटलापाटलांशुका।**

**वारुणीवारुणीभूतसौरभा सौरभास्पदम्॥**[39]





अत्र **रमणी रमणी**, **पाटला पाटला**, **वारुणी वारुणी, सौरभा सौरभा** इत्येतेषु चतुर्ष्वपि चरणेष्वादिगताव्यपेतो यमकाऽलङ्कारो विद्यते।

वसन्ते नायिकादूती नायकं वक्ति—

**सालं सालम्बकलिकासालं सालं न वीक्षितुम्।**

**नाली नालीनबकुलानाली नालीकिनीरपि॥**[40]

सा अलं सालम्बम्बिकासालं सालं न वीक्षितुं न अलीन् आलीनबकुलान् आली नालीकिनीः अपि इति पदपाठः। अत्रापि यमकालङ्कारस्य सौन्दर्यं सहृदयहृदयानां प्रीतिदायकमिति।

महायमकस्येयं विच्छित्तिरत्रानुष्टुब्छन्दसा प्रकटिता दण्डिना—

**समान्यासमान्या समान्यासमान्या।**

**स मा न यासमानया समानयासमानया॥**[41]

समानया, असमानया, समानमासमानया, सः, मा, न, या, असमानया, समानय, असम, अनया इति पदच्छेदः।

केवलकण्ठ्यवर्णविन्यासादेकस्थाननियमोदाहरणमिदमत्रेत्थं प्रदर्श्यते—

**अगा गाङ्गाङ्गकाकाकगाहकाघककाकहा।**

**अहाहाङ्क खगाङ्कागकङ्कागखगकाकक॥**[42]

चतुर्वर्णनियममुदाहरतीत्थम्—

**रे रे रेरूरुरूरोरुगागोगोगाङ्गगागगुः।**

**किं केकाकाकुकः काको मा मामामाममामम॥**[43]

त्रिवर्णनियममुदाहरति—

**देवानां नन्दनो देवो नोदनो वेदनिन्दिनः।**

**दिवं दुदाव नादेन दाने दानवनन्दिनः॥**[44]

द्विवर्णनियमस्योदाहरणं यथा—

**सूरिः सुरासुरासारिसारः सारससारसाः।**

**ससार सरसीः सीरी ससूरूः स सुरारसी॥**[45]

एकवर्णनियममुदाहरति यथा—

**नूनं नुन्नानि नानेन नाननेनाननानि नः।**

**नानेना ननु नानूनेनैनेनानानिनो निनीः॥**[46]

अत्रेत्थमन्वयसरणिः— अनेन अननेन नः अननानि न नुन्नानि न, अनूनेन एनेन अनान्निनीः इनः ना अनेनाः न। अत्र केवलेन नकारेण निबन्धादेकवर्णनियमो बोध्यः।

इत्थं **शब्दार्थयोर्द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेदिति** भट्टनायकवाक्येनात्र शब्दार्थयोर्द्वयोरप्यापूर्ववस्तुनिर्माणक्षमया प्रज्ञया अलोकसामान्यं किमप्यनिर्वचनीयं वस्तुतत्त्वं सहृदयाभिलषणीयचमत्कारसाररसनिःष्यन्दमानमभिव्यक्तं कविपुङ्गवेन दण्डिना।

सत्यमेवोक्तं श्रीमदानन्दवर्धनाचार्यपादैः विषमबाणलीलायाम्—

**न च तेषां घटतेऽवधिः न च ते दृश्यन्ते कथमपि पुनरुक्ताः।**

**ये विभ्रमाः प्रियाणामर्था वा सुकविवाणीनाम्॥**[47]

इदम्बादिवृत्तं मन्दामन्दमतीनां सर्वेषामपि हिताहितौपयिकबोधनक्षममनायासेनेति नात्र केषाञ्चिदपि शङ्काकणिकावसरः। तस्मादिदमवादि क्षेमेन्द्रेण पण्डितेन्द्रेण—

**शास्त्रं कुर्यात्प्रयत्नेन प्रसन्नार्थमनुष्टुभा।**

**येन सर्वोपकाराय याति सुस्पष्टसेतुताम्॥**[48]

**तथ्यसूत्राणि—**

1. ध्वन्यालोकः, 1/5
2. रघुवंशम, 14/70
3. गुरुमुखादधीतम्
4. सुवृत्ततिलकम्-2/4
5. काव्यादर्शः-1/1
6. काव्यादर्शः- भूमिकाभागः





7. तत्रैव- 1/4
8. तत्रैव- 1/6
9. तत्रैव- 1/7
10. महाभाष्यम्-पस्पशाह्निकम्।
11. काव्यादर्शः-1/8
12. तत्रैव- 1/9
13. तत्रैव- 1/10
14. सुवृत्ततिलकम्, 3/5
15. काव्यादर्शः-1/48
16. तत्रैव- 1/49
17. तत्रैव- 1/51
18. तत्रैव- 1/57
19. तत्रैव- 1/82
20. तत्रैव- 2/57-65
21. वैयाकरणभूषणसारः- निपातार्थविचारः
22. वाक्यपदीयम्
23. काव्यादर्शः-2/81
24. तत्रैव-2/90
25. तत्रैव-2/105
26. सुवृत्ततिलकम्- 3/9-10
27. काव्यादर्शः- 2/141
28. तत्रैव- 2/172
29. तत्रैव- 2/173
30. तत्रैव- 2/201
31. तत्रैव-2/215
32. तत्रैव- 2/236
33. तत्रैव- 2/244
34. तत्रैव- 2/247
35. तत्रैव- 2/248
36. तत्रैव- 2/249
37. तत्रैव- 2/250
38. तत्रैव- 2/251
39. तत्रैव- 3/18
40. तत्रैव- 3/34
41. तत्रैव- 3/71
42. तत्रैव- 3/91
43. तत्रैव- 3/92
44. तत्रैव- 3/93
45. तत्रैव- 3/94
46. तत्रैव- 3/95
47. **ण अ ताण घडइ ओही ण अ ते दीसन्ति कह वि पुनरुत्ता।**
    **जे विब्भमा पिआणं अत्था वा सुकइवाणीणम्॥**
    लोचनटीकायाम्
48. सुवृत्ततिलकम्- 3/6

**सन्दर्भग्रन्थसूचिः—**

1. काव्यादर्शः-आचार्यरामचन्द्रमिश्रः, चौखम्बाविद्याभवनम्, वाराणसी, 1958
2. काव्यादर्शः- पण्डितरङ्गाचार्यशास्त्री, भाण्डाकरप्राच्यविद्यामन्दिरमुद्रणालयः, पुण्यपत्तनम, 1938

3. ध्वन्यालोकः- आचार्यजगन्नाथपाठकः, चौखम्बाविद्याभवनम्, वाराणसी, 2011

4. रघुवंशम्-वासुदेवशर्मापणशीकरः, पाण्डुरङ्गजावजी, निर्णयसागरमुद्रणालयः, मुम्बई, सप्तमसंस्करणम्-1929

5. सुवृत्ततिलकम्-पण्डितब्रजमोहनझा, चौखम्बासंस्कतसीरिजऑफिस, वाराणसी, 1968

6. वृत्तरत्नाकरः-डॉ. आर्येन्द्रशर्मा, संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद, 1969

7. वैयाकरणभूषणसारः- कौण्डभट्टः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2017

8. वाक्यपदीयम्(ब्रह्मकाण्डम्)-भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी 2006

9. महाभाष्यम्- पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2008





# भट्टिकाव्यस्य काव्यसौन्दर्यम्

डॉ. शिप्रा राय
अध्यापिका
संस्कृतविभागः, त्रिपुराविश्वविद्यालयः

महाकविभट्टिना रचितं काव्यं भट्टिकाव्यम् इति कथ्यते । रामायणस्य कथामवलम्ब्य भट्टिना काव्यमिदं विरचितम् । अस्मिन् काव्ये व्याकरणालंकारौ पाठकान् शिक्षयतः । भट्टिकाव्यं व्याकरण-काव्यमिति केचित् वदन्ति । कैश्चित् पण्डितैः व्याकरणमिति कथ्यते । मल्लिनाथेन भणितम् यत् काव्यमिदं उदाहरणकाव्यम् अर्थात् व्याकरणस्य विविधानां सूत्राणां प्रयोगो हि कवेः अभिप्रेतम् । व्याकरणकाव्यरूपेण ग्रन्थेऽस्मिन् व्याकरणस्य विविधानां सूत्राणां उल्लेखः क्रियते । व्याकरणशास्त्रस्य वर्णान् दृष्ट्वा सन्देह जायते यत् नीरसं जटिलं भयावयम् इदं काव्यम् । प्रकीर्णकाण्डस्य विभिन्नानां सर्गाणां नामानि यथा रामसम्भव-सीता-परिणय-रामप्रवास इत्यादयः । पुनः अधिकारकाण्डस्य विभिन्नेषु सर्गेषु कृत्प्रत्यय-स्त्रीप्रत्यय-आत्मनेपदविधान-षत्व-णत्वविधानां तिङन्तकाण्डे च लिङ्-लृङ्-लुट्-लट्-लोट्-लुट्-लृङादिविभक्तीनां प्रयोगः दृश्यते । व्याकरणस्य बहुविधप्रयोगसत्त्वेऽपि कविना काव्यस्यास्य द्वाविंशसर्गे कथितम् –

"व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।

हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया ॥"[1] इति

व्याख्यायोग्यमिदं काव्यम् अर्थात् व्याख्यायां कृतायां पण्डितवर्गेषु आनन्दम् उत्पादयति । पाण्डित्येन सह कवित्वस्य अपुर्व संमिश्रणं संघटते अस्मिन् काव्ये । महाकाव्यस्य सर्वाणि लक्षणानि काव्येऽस्मिन् परिदृश्यन्ते । भट्टिना विविधानां अलंकाराणाम् उदाहरणानाम् उल्लेखः क्रियते । यमकालंकारस्य प्रयोगः दृश्यते यथा –

"सरसां सरसां परिमुच्य तनुं पततां पततां ककुभो बहुशः ।

स-कलैः सकलैः परितः करुणैरुदितै रुदितैरिव खं निचितम् ॥"[2] इति

उपमालंकारस्य प्रयोगः दृश्यते यथा –

"रघु-तनयमगात्तपोवनस्थं विधृतजटाऽजिनवल्कलं हनूमान् ।

परमिव पुरुषं नरेण युक्तं सम-शम-वेशसमाधिनाऽनुजेन ।।"[3] इति

स्वभावोक्ति इति अलंकारस्य वर्णना दृश्यते निम्नलिखिते श्लोके -

"जलनिधिमगमन्महेन्द्रकुञ्जात् प्रचयतिरोहिततिग्मरश्मिभासः ।

सलिलसमुदयैर्महातरङ्गैरभुवनभरक्षममप्यभिन्नवेलम् ।।"[4] इति

छन्दश्शास्त्रेष्वपि महाकवेः भट्टेः पाण्डित्यं लक्ष्यते । तस्य काव्ये तेन षड्-विंशच्छन्दसां उदाहरणानि प्रदत्तानि । उपनिषत्- सांख्य-योगायुर्वेद-राष्ट्रनीति-सामाजिकनीतिषु तस्य गभीरपरिचयः आसीत् । काव्यस्य त्रयोदशसर्गः 'भाषासम' इति नाम्ना व्यपदिश्यते । अस्य सर्गस्य प्रथमाश्लोके मल्लिनाथकृतटीकायां एवं दृश्यते –

"अथास्मिन् सर्गे भषासङ्करस्यापि चमत्कारकारितया काव्येऽलङ्कारत्वेन तन्निवध्नन् अपभ्रंशादीनां तथा प्राकृतभेदेषु च देशितद्भवयोश्च संस्कृते समावेशासम्भवात् तत्समाख्यभेदाश्रयणेन भाषासमाख्यं शब्दचित्रमाधुर्यगीत्याख्येन मात्रावृत्तेनाह चार्वित्यादि।" सर्गेऽस्मिन् भट्टिः न केवलं वैयाकरणः, अपि तु एकः भाषाविद् महाकविश्च । भट्टिना स्वयमेव वर्णितम् –

"दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।

हस्तामर्ष इवान्धानां भवेद् व्याकरणादृते ।।"[5] इति

व्याकरणदीपं विना काव्यसौन्दर्यं न बर्द्धते । भट्टिना तत्कृते काव्यग्रन्थे सुनिपुणरूपेण वैदर्भीरीतेः प्रयोगः कृतः । प्रकाशस्य सावलीलता , भाषायाः स्वच्छता च तस्य काव्ये परिदृश्यते । अवान्तरविषयबाहुल्येन तस्य काव्यग्रन्थः न भाराक्रान्तः । रसवर्णनायामपि महाकविभट्टि सुनिपुणः आसीत् । रौद्रभयानकरसवर्णनायां रूढशब्दाः आश्रिताः कविना । शब्दनिर्वचनकौशलं, दुर्लभशब्दानां प्रयोगः, नवीननवीनशब्दानां संयोगश्च , कदापि विषयवस्तुना सह असंगतिं न सृजति । विषयवस्तुवर्णनप्रसङ्गेनैव विचित्राणां धातूनां प्रयोगः कृतः । तथापि भट्टिप्रसङ्गेनैव इदं वाक्यं न प्रयुज्यम् यत् व्याकरणपाठदानं नासीत् तस्य मूलं लक्ष्यम् ।

भट्टिकाव्ये काव्यस्य भावप्रवाहः कुत्रापि न व्याहतः । अनर्थोदाहरणबाहुल्येन तस्य काव्यं न भाराक्रान्तम् । स समग्रव्याकरणशास्त्रं कतिपय-अधिकरणैः विभक्तम् । भट्टेः कविप्रतिभा





काव्यस्यास्य द्वितीयसर्गे शरद्वर्णनायां, दशमसर्गे अलंकारवर्णनायां च विकसिता । अपि च विविन्नेषु सर्गेषु नगर-ऋतु-प्रभात इत्यादीनां वर्णना कृता । शरद्वर्णनायाः उदाहरणं यथा –

"दत्तावधानं मधुलेहिगीतौ प्रशान्तचेष्टं हरिणं जिघांसुः ।

आकर्णयन्नुत्सुकहंसनादान् लक्ष्ये समाधिं न दधे मृगावित् ।।"[6] इति

अपि च –

" न तज्वलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।

न षट्पदोहसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ।।"[7] इति

समुद्रवर्णना यथा दशमसर्गे –

"न भवति महिमा विना विपत्तेरवगमयन्निव पश्यतः पयोधिः ।

अविरतमभवत् क्षणे क्षणेऽसौ शिखरिपृथुप्रथितप्रशान्तवीचिः ।।"[8] इति

एतादृशानां मधुरश्लोकानां व्यवहारः भट्टिकाव्ये सर्वत्र परिदृश्यते । उत्प्रेक्षा – उपमा – रूपक-स्वभावोक्तिप्रभृतीनाम् अलंकाराणां वैचित्र्यं तस्य काव्ये सर्वत्र चन्द्रमा इव शोभते । काव्यस्यास्य द्वितीयसर्गे ग्राम्यजीवनस्य वर्णना अतीव सावलीलभाषया कृता । उदाहरणं यथा –

"विवृत्तपार्श्वं रुचिराङ्गहारं समुद्वहच्चारुनितम्बरम्यम् ।

आमन्द्रमन्थध्वनिदत्ततालं गोमाङ्गनानृत्यमनन्दयत्तम् ।।"[9] इति

श्लोकमिदं संलक्ष्य कैश्चित् समालोचकैः भट्टिकाव्यं काव्यकारेण व्याकरणम् (Poetical Grammar) इति कथ्यते , विरोधितया वा कैश्चित् पण्डितैः कथ्यते यत् इदं काव्यं व्याकरणाकारेण काव्यम् (Grammatical Poem) । व्याकरणस्य सूत्राणां संज्ञा न निरूप्य केवलं तेषा संज्ञाः उदाहरणरूपेण बोधयति । आलंकारिकसम्मतं सर्वविधं काव्यलक्षणं भट्टिकाव्ये स्थितम् । भट्टिकाव्यं व्याकरणशास्त्राकारेण काव्यम् इति न उचितम् । काव्यसौन्दर्यम् अत्र गृहीतम् । व्याकरणस्य प्रयोगबाहुल्यं केषुचित् क्षेत्रेषु काव्यस्य

स्वाभाविकीं गतिं नष्टं करोति इति सत्यं तथापि व्याकरणस्य विशिष्टं प्रयोगं कवेः प्रकाशभङ्गिना सह काव्यसौन्दर्यं वर्द्धयति । अतः भट्टिकाव्यम् उत्कृष्टं काव्यमेकं इत्यत्र नापि सन्देहः । यत्र कविना व्याकरणशृङ्खला मुक्ता तत्र तस्य कविप्रतिभा स्फुरिता । द्वितीयसर्गे यथा –

"लतानुपातं कुसुमान्यगृह्णात् स नद्यवस्कन्दमुपास्पृशञ्च ।

कुतूहलाच्चारुशिलोपवेशं काकुत्स्थ ईषत् स्मयमान आस्त ।।"[10] इति

वक्रोक्तिप्रयोगेनापि कवेः पाण्डित्यं प्रकटितम् । आशीर्नमस्क्रियावस्तुनिर्देशविधं त्रिविधप्रकारकं मङ्गलाचरणं भट्टिकाव्ये परिदृश्यते । कवेः नामानुसारेण भट्टिकाव्यम् इति काव्यस्य नामकरणं कृतम् । यदि रावणवधं, रामचरितं, राममहाकाव्यं वा इति रूपं गृहीतं तत्रापि विषयवस्तु एव अवलम्ब्यते ।

उपसंहाररूपेण एवं कथ्यते यत् भट्टिकाव्यं न उदाहरणकाव्यम् । काव्येऽस्मिन् कविप्रतिभायाः परिचयः ज्ञाप्यते । तस्य कृतित्वं यत् तेन कस्यापि कवेः रचना न अनुकरणीकृता । स्वप्रतिभाबलेनैव व्याकरणस्य उपयोगः काव्यरसास्वादनस्य आनन्दः सृजति। काव्यस्य आवेदनं सहृदयहृदयग्राही । अस्य काव्यस्य त्रयोदशसर्गः संस्कृतप्राकृतभाषयोः मिश्रणकाव्यरूपेण गृहीतम् । प्राचीनटीकाकारैः भट्टिः महाकवि इति स्वीक्रियते तस्य काव्यं च महाकाव्यं इति कथ्यते । अतः कथ्यते यत् – भट्टिकाव्यस्य काव्यसौन्दर्य्यं अतुलनीयम् । डक्टर-कीथ महोदयेन अवदत् –

"Bhatti's poem, a lamp in the hands of those whose eye in grammar, but a mirror in the hands of the blind for other, is essentially intended to serve the double plan of describing Rama's history and of illustrating the rules of grammar."[11] इति शम् ।

---

1 भट्टिकाव्यम्, २२.३४
2 भट्टिकाव्यम्, १०.४
3 भट्टिकाव्यम्, १०.३१
4 भट्टिकाव्यम्, १०.५२
5 भट्टिकाव्यम्, २२.३३
6 भट्टिकाव्यम्, २.७





7 भट्टिकाव्यम्, २.१९
8 भट्टिकाव्यम्, १०.६३
9 भट्टिकाव्यम्, २.१६
10 भट्टिकाव्यम्, २.११
11 A History of Sanskrit Literature , page. 116

<u>सहायकग्रन्थाः</u>


1. संस्कृतसाहित्यसम्भार (भट्टिकाव्यम्), नवपत्रप्रकाशन, कलकाता ।
2. भट्टिकाव्यम्, भट्टिः, सं. डॉ. अनिल चन्द्र वसु, संस्कृत बुक डिपो, कलकाता, तृतीय संस्करण, 2005
3. A History of Sanskrit Literature , A.B. Keith, Motilal Banarsidass Publication Private Limited, Delhi, First Indian Edition, Delhi, 1993

TITLE : **OBSCURITY AND INTERPRETATION OF TRANSCENDENTALISM IN WALT WHITMAN'S POEM**

**"THE CABINED SHIPS OF SEA"A STRUCTURALIST PERCEPTION**

**AUTHOR : Kishore A.P**

**Assistant Professor of English, Seshadripuram Degree College, Mysuru – 01 E-mail: kishore.a.prakash@gmail.com**

**Abstract**

The paper seeks to delve in to the mystery that lingers in Walt Whitman's work. The cabined ships of sea'. The poem was published in the anthology of poems entitled Leaves of Grass. The collection of poems was first published in 1855.Other poems in the collection are mysterious indeed. This particular piece of work has a powerful speech blend with transcendentalism and mystery. Both are in fact one. Another worthwhile aspect is how the theory of structuralism and Transcendentalism are interwoven. It looks in to the issue of syntax, vocabulary, meanings derived from the words used in the poem thereby arriving at a conclusion that the linguistic structure bore philosophical elements as well. It has been found out that the linguistic elements indeed have a profound impact on moulding ideologies. Transcendentalism is a philosophical way of thinking, which gives more emphasis to individualism and emphasizing the importance of the nature. These elements are inherent in the poetical work of Walt Whitman. He was deeply influenced by the works of Thoreau and Emerson; two prominent figures in American transcendentalism. The Method adopted to study the research topic is structuralism. This literary theory posits three aspects, viz; Interpretation (Hermeneutics), correlation of other





ideologies to say, how the poem is relational to transcendentalism and how syntactical elements culminates to the formation of philosophical notions inherent in the poem. The theory of structuralism postulates the relational and interconnection of two ideas. Structuralism perceives everything relational, there is nothing called 'stark distinction', The paper tries to establish that in the realm of hermeneutics: poetical works are interpreted using the frame work of structuralism. The word 'obscure' delineates the notion of mystery. Analyzing Whitman's poem takes us to nether world, a world of mystery and fantasy unlike the earthly world. The linguistic components culminate in this regard. Thus, this paper tries to find out the philosophical overtone through the method of the theory of structuralism. A similar method is being incorporated in analysing the Obscurity and Interpretation of Transcendentalism of Walt Whitman's poetry where , "The Cabined ships of Sea " based on Structuralism , Hermenuetics , Mimansa and Indology can be brought into consideration.

**Key words :** Hermeneutics, Struturalism, Mimansa and Indology.

**Funding :** No funding received.

**Co – Authors :** No Co- Author

The beauty and values enshrined in the poem 'In cabined ship at sea', penned by acclaimed American poet , Walt Whitman[1819-1892] indeed made a mark on the readers mind. The lines are captivating, takes reader to another dimension. The word 'obscurity' pervades from the beginning till the end. "Obscure" is synonymous with Whitman's sense of poetry. His poem never lauded materialistic achievements, but stressed the significance of soul. In his preface to 1855 edition of his magnum opus Leaves of grass he stated about significance and vitality of

soul. He says: 'The largeness of nature or nation were monstrous without corresponding largeness and generosity of the spirit of the citizen. Not nature nor swarming states, nor streets and steamships, nor prosperous business, nor farms, nor capital, nor learning may suffice for the ideal man.......a live nation can always cut a deep mark and can have the best authority the cheapest namely from it's own soul'(Whitman502).It is evident from his quote that Materialism is banned from the vicinity of his poetry and give much importance to spiritualism, the soul. In this regard he emphasized the characteristic of an ideal America(The nation), it constitutes the spirit not materialism(Contradicted to Karl Marx his contemporary).This astounding poem throws light aspirations of sailors, their experience while sailing and their reminiscence of the land. Every word in the line of the poem has a rendition of mystery. Words like "Cabined ships" , "sea","ether","pulsation", "dense", "buoy"' are indeed shrouded in mystery. Even lines like:

"Or some bark buoyed on the dense marine..........

the vague and vast suggestion of the briny world"

These lines suggest the mystery that conceals in every word. A poet who tends towards nature is rather bizzare. Walter Whitman is one chief advocates nature. The idea of the paramountancy of the nature stemmed from romanticism as well as Transcendentalism. The genesis of the intellectual thought called Transcendentalism is attributed to the works of American philosophers Ralph Waldo Emerson and Henry David Thoureau.The former cast deep influence over Whitman. It is widely believed that the "leaves of Grass" were published at the instance of Emerson. Transcendentalist thought are predominant in USA prior to civil war. It became the norm of American culture for a decade. It reached zenith during 1840-1860.Eminent literary figures of the age professed the ideology of transcendentalism.MH Abrams, American literary





critic opined: 'Transcendentalists were grounded in feeling and intuition……an ethics of individualism that stressed self- trust, self-reliance and self-sufficiency"(Abrams410).Elements of this opinion is echoed in Whitman's poetry. Being one of the poems in the anthology Leaves of grass, individualism is highly resonated throughout the lines.

Another noteworthy aspect is the bridge between structuralism and Transcendentalism. This discipline of literary theory never emphasis the importance of text. It denies the meaning inherent in text, but assimilates foreign elements as well. A foreign element refers to the factors exterior of the text. For instance, to study a piece of work never focus the text itself a reader should consider certain factors such as : context and genres. This is the nub of structuralism. This proposition applies to the reading of Cabined ship at sea. The poem can be interpreted as man's quest for triumph. There are certain sign that denotes this idea. Consider the word ocean. As structuralists perceive there is no inherent meaning (Conventional meaning) in a word. Man creates meaning hence it is conventional. But the Sausseranian thought compel us to think differently. The word ocean has different meaning. The conventional meaning of ocean is a body of water. Ocean signifies the color blue. Another implication of the term is vast or wide. Consider one of the lines of the poem' the boundless blue on every side expanding'. It's an attribute to Ocean. Another instance is the usage of the phrase' lone bark'. Bark is a translated from the French word Barque which denotes a ship or a vessel. Astounding fact is the translation displaces idea. Despite considering theme as an example of homophone, it is important to look at meanings likely to be interchanged. Bark in English refers to a loud noise, the constituent part of the tree as well. Perception varies; reader may imagine that object as a piece of wood floating over the water. In fact vessels of Whitman's times are made of wood. He might consider the vessel as piece of wood. The bark indeed attributed to wood .Structuralism unearths truth in a

different manner. It comes under the broader realm of the Hermeneutics. Another aspect to ponder is the contrasts and their cultural significance (as espoused by French structuaralist, Roland Barthes). Barthes mentions the cultural code. Cultural code is one of the classifications made to analyze the story. In this respect, individualistic text-centered approach is of secondary importance, but assessment of text is done on the basis of larger context, generalized conception, precisely. Consider the following lines:

"Boundless vista and the horizon far and dim are all here

And this is ocean's poem."

As mentioned earlier ocean denotes the meaning vast .In this regard, meaning of the line is modified .It is interpreted in both way and using different ideologies through generalizing them. Relating with the realm of philosophy, the above lines are interpreted as life vast and dim. The word" Dim" has negative connotation also indicate obscure elements of the poem. Another rendition of these lines is the nature. Word such as Vista and horizon denotes nature. Thus a reader can assume the intention of the reader as well. Stereotype is another essential feature of cultural code. There is a speck of wilderness in the poem as well. For instance. Lines such as:

"Bear fort to them folded my love (dear mariners for you I fold it here in every leaf)………

Spread your white sails, my little bark athwart."

These lines are rather obscure and have negative connotation. Henceforth these lines are mysterious indeed. Readers can derive any meaning out of it. They alter the very structure of this line as well.





Another significant aspect is how structuralism pave the way for Transcendentalism in relation to the poem? Structuralism, being interpretative in nature changes the inner meaning of the text and brings forth new meaning to the text. The poem indeed has philosophical elements and the altered premise of the poem is to seek the truth. Author intends the tone and tenor of the poem in different perspective. Words such as 'faith', 'destiny' words that delineates nature like Ocean, sky, waves, land as well indicates transcendentalist elements. Sometimes the reader may feel that Whitman is absorbed in nature. This is the essence of Transcendentalism. Structuralism and transcendentalism has similar tone and tenor. Transcendentalism has affinity towards nature. The shrill of nature echoes in the poem. Even nature has life .The figure of speech used in the poem is personification. Personification gives human attributed to non –living object.

In the end, it is possible to perceive a poem in a structuralist way of thought. It unravels truth and highlights concealed secrets. It is interpretive in nature and derive a different proposition.

**Critical Appreciation**

Mimansa and Vedic Hermenuetics dealt with Vedanta and Upanisads can form a foreground principles in analysing poetry, where Indology can play a crucial role .

A possible analysis based on structuralism and founding text of Mimamsa and it's principles can develop a , historically and philosophically influenced understandings of poems. A similar method is being incorporated in analysing the Obscurity and Interpretation of Transcendentalism of Walt Whitman's poetry where , "The Cabined ships of Sea " based on Structuralism , Hermenuetics , Mimansa and Indology can be brought into consideration.

Vedic hermeneutics perceptions in the critical interpretation of text leads to it's origin on Vedas, which are inturn based on well known Hindu texts in the filed . Top hermeneutic school,

Mimansa and it's percetion of Dharma and way of life has its own sensibilities in Vedic understanding through Hermenuetic school. Mimamsa and the critical works on Mimansa by well known authors are quite valuable in developing a comparative study of poems using structuralism and Indology and Hermenuetics.

**WORKS CITED**


- Barry, Peter, Beginning Theory.3rd ed., Viva books, 2013
- Whitman, Walt, Leaves of Grass.1st ed., Alma books, 2019
- Abrams, M H., and Geoffrey Galt Harpham.A Glossary Of Literary Terms.11th ed., Cengage,2019
- Hiriyanna, M. (1995). The Essentials of Indian Philosophy. Delhi: Motilal Banrasidass. ISBN 81-208-1330-8.
- Jaimini: Mimamsasutra at Sansknet project Archived 2007-06-09.






# समाजे राष्ट्रनिर्माणे च नारीणां योगदानम्


**डा0 पूनम सिंह**
**एसोसिएट प्रोफेसर**
**संस्कृत विभाग,**
**डी0ए0वी0 पी0जी0 कालेज, वाराणसी।**


मायकल्पितप्रपञ्चसमूहे नामरूपात्मके जगति प्रादुर्भूतानां जनयुजाणां महत्वं मातृशक्तीनां प्रथमशिक्षिकाणां नारीणां पुराकाले वैदिककाले, स्मृतिकाले रामायणमहाभारतादिकाले च सर्वतः गौरवास्पदमासीदिति सर्वजनीनमेतत्। महाभारतेऽप्युक्तमस्ति–

**नास्तिमातृसमः शिक्षकः कोऽप्यन्यः इति।**

अथ च **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः (मनु. 3.56)**

सैव परिवारकार्यसञ्चारिणीति शब्दवाच्यतां लभते यतोहि अनया परिवारे सामञ्जस्यं सौहार्दञ्चोत्पद्यते

ता एव भक्तिविनम्रताकर्तव्यपरायणत्वेन समाजस्य राष्ट्रस्य वा उत्तरदायित्वं निर्वहन्ति।

संसारेऽस्मिन् मातैव सा शक्तिः या विनय – माधुर्यशीला, ममतामूर्तिः, क्षमाप्रवणा, स्नेहसिक्ता, समाजनिर्मात्री, राष्ट्रनिर्मात्री चास्तीति। यतोहि सा स्नेहं संचारयति, सद्भावान् आविर्भावयति, दुर्भावान् दमयते विनयं प्रश्रयति, शीलं सम्पोषयति येन कथमन्य समाजस्य राष्ट्रस्य वा निर्माणं मुक्तवातावरणे भवितुमर्हतीति

वेदादिषूपनिषत्सु धर्मशास्त्रेषु च मातृमहत्त्वं गौरवं चानेकधा प्रतिपाद्यते यजुर्वेदे माता पवित्री शोधिका च प्रोच्यते। **आपो अस्मान् मातरः शुन्धयन्तु (यजु0 4.2)**

तैत्तिरीयोपनिषदि **मातृ देवो भव (तै0 9.99.2)** इति अनुशिष्यते। साम्प्रतं स्त्री शिक्षा प्रतिदिनं वर्धते एव। प्रतिदिनं सहस्रशो नार्यः ज्ञान–विज्ञान–कलासंकाये उत्कृष्टोपाधिभिः विभूष्यन्ते। ताः शिक्षिता नार्यो विज्ञानक्षेत्रे, व्यवसायक्षेत्रे व्यापारवाणिज्यसम्बन्धेषु कार्येषु महती क्षमता द्योतयन्ति प्रशासनसम्बद्धेषु अन्तरिक्षयानेष्वपि तासाम् उपस्थितिः न कस्य मनः आश्चर्यचकितं कुर्यात्।

शिक्षणकार्ये, चिकित्साक्षेत्रे, सेवाक्षेत्रे, प्रसाधनकार्येषु च नार्यो विशेषरूपेण अधिकं साफल्यं लभन्ते। सूचनाप्रौद्योगिक्यां, टेलीफोन–तार–नावरलेरा–प्रभृतिषु संचारमाध्यमक्षेत्रेषु नार्यः पुरुषापेक्षया आधिक्यं भजन्ते। संगणकस्य (कम्प्यूटरस्य) उपयोगः साम्प्रतं प्रतिगृहं प्रतिकार्यालयं चानिवार्यत्वं धत्ते। तत्र नार्यो विशेषरूपेण साफल्यं लभन्ते अतस्तासाम् एतादृशेषु उद्योगेषु प्रवेशं विशेषरूपेण विधीयते बीमा–बैंकिंग–शेयर–प्रभृतेषु उद्योगेष्वपि महिलानाम् आधिक्यं संलक्ष्यते।

यदि कार्यक्षमता दृष्ट्या विचार्यते तर्हि एतद् वक्तुं पार्यते यत् स्त्रियोऽपि पुरुषवत् सर्वं कार्यालयीयं कार्यम्, विज्ञानसंबद्धकार्यम्, अनुसन्धानकार्यम् व्यवहारिकं च कार्यं कर्तुं क्षमाः सन्ति।

यदि सर्वकारेण तासां प्रतिभा–प्रकाशनार्थं सहयोगः क्रियते, तर्हि ता व्यवहारकार्ये नूनं साफल्यं लप्स्यन्ते।

विषयस्यास्य गाम्भीर्यविवेचनायाः पूर्वमस्माभिरवश्यमेव विचारणीयं यत् कस्तावत् समाजः? किं तावद् राष्ट्रं? कीदृशं योगदानं तयोः निर्माणे?

## कस्तावत् समाजः?

सामान्यतया समाजशब्दस्य प्रयोगः व्यक्तीनां समूहे भवति, अथ च कस्यापि संगठितासंगठितसमूहस्य कृतेऽपि समाजशब्दस्य प्रयोगः जनैः क्रियते यथा आर्यसमाजः,





ब्रह्मसमाजः, प्रार्थनासमाजः, हिन्दूसमाजः जैनसमाजः, विद्यार्थीसमाजः, महिलासमाजश्च। साधारणतया अस्CEचारसौ अर्थः विभिन्नैः पुरुषैः स्वविचारेण प्रस्तुतः। केषाCEचद् मते संस्थारूपार्थे भवति। अत एव कारणात् समाजस्य मौलिकार्थे निश्चिततायाः अभावो दृश्यते विभिन्नैः समाजवैज्ञानिकैरपि अस्य मौलिकार्थः स्वविचारेण देशकालपरिस्थित्यानुसारेणोपदर्शितः।

अस्योदाहरणं तावद् समाजशास्त्रिणा समाजस्य प्रयोगः व्यक्तीनां समूहे कृतः। मानवशास्त्रिणा आदिमसमुदायार्थे अस्य प्रयोगोपदर्शितः। अर्थशास्त्रिणा आर्थिकक्रियासम्पन्नकर्तॄणां व्यक्तीनां समूहे कृतः तस्मादिदमवबुद्ध्यते यत् अस्य व्याख्या, परिभाषा, अर्थश्च देशकालपरिस्थित्याऽपि भवितुमर्हतीति।

## किं तावद् राष्ट्रम्

कस्यापि देशस्याध्यात्मिकी मानसिकी च विभूतिः तस्य देशस्य संस्कृतिः भवति। भारतीयानां सफलमानसिकनिधेः अभिव्यक्तेर्नाम भारतीयसंस्कृतिरस्ति। एषा संस्कृतिः भारतीयजनतायाः विविधसाधनानां सुन्दरतमा परिणतिः अस्ति।

राष्ट्रस्य निर्माणम् उन्मुक्तवातावरणे अभवत् वैदिककालस्य प्रबुद्धाः ऋषयः तथा च प्रबुद्धाः मनीषिणः राष्ट्राय दिव्यस्वरूपं प्रदत्तवन्तः।

तस्मात् कालादेव भारतीयैरस्य बहुविधोविकासो विहितः। समन्वयस्य भावना राष्ट्रस्य प्रमुखा भावना, अनया भावनया एव इदं राष्ट्रम् अनेकशः राष्ट्रेभ्यः भिन्नमस्ति। भारतस्य धार्मिक–ग्रन्थेषु समन्वयभाव–विषये ध्यानमतीव वैशिष्ट्यं वर्तते।

भारतीयाः मनीषिणः जीवनस्य विविधक्षेत्रेषु सर्वदा समन्वयं कर्तुं प्रयासमकुर्वन्। समन्वयबुद्धेः प्रमुखाधारः आध्यात्मिकता अस्ति। इयमेव राष्ट्रस्य प्रधानतत्त्वमपि विद्यते।

**यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।**

**सर्वभूतेषु चात्मानं ततो न विजिगुप्सते।। ईशा 6**

एतस्याः आत्मभावनायाः आधारेणैव इदं राष्ट्रं विविधक्षेत्रेषु समन्वितं विद्यते। वैदिकदेवतावादस्य मूलेऽपि एषैव समन्वयभावना दृष्टिगताऽस्ति राष्ट्रमिदं सर्वेषु राष्ट्रेषु श्रेष्ठं वर्तते।

## समाजनिर्माणे योगदानम्

अधुना नारीणां यस्तावद् अधिकारः वर्त्तते तासामधिकारे ह्रासो दरीदृश्यते, येन समाजशक्तेः विघटनं भवति यतोहि नार्य एव समाजनिर्मात्र्यो भवन्ति। अद्य खलु बालिकाः सर्वेषु क्षेत्रेषु पुरुष इव कार्यं कुर्वन्ति तासां सम्मानोऽपि दृश्यते किं बहुना तासु कार्यक्षमतायाः आधिक्यमपि दृश्यते ज्ञायते च। यथा–क्रीडादिषु क्षेत्रेषु पी०टी० उषा, सानिया मीर्जा, साइना नेहवाल इत्यादिभ्यः भारतस्य ख्यातिः कीर्तिः गुणश्च संप्रकाशते। अथ च समाजसेवायां "मदर टेरेसा" तथा "मेधा पाटेकर" इत्यादीनां नाम उल्लेखनीयं वर्तते।

भारतीयमूलस्य निवासिन्यौ "कल्पना चावला" सुनीता विलियम्स द्वे नार्यौ अन्तरिक्षक्षेत्रे ख्यातिं स्वीकृत्य न केवलं समाजस्य निर्माणे अपितु राष्ट्रस्य निर्माणेऽपि सहयोगं प्रदत्तवत्यौ। पण्डितारमाबाई, लक्ष्मीलाकर, रानीलक्ष्मीबाई वीराङ्गनाश्चोऽपि समाजस्य निर्माणे सहयोगः अत्युत्तमं योगदानं च दृश्यते ताः स्वकार्यक्षमतया अप्रतिमशक्त्या समाजस्य परिमार्जने अप्रतिमानिष्ठाः प्रदर्शितवत्यः। अथ च प्रायशः एकशताब्दीपूर्वं नारी–स्वातन्त्र्यस्य स्वायत्ततायाश्च आन्दोलनं प्रारब्धम्।

एतस्य आन्दोलनस्य प्रवर्तकाः मुख्यत्वेन सन्ति स्वामी दयानन्दः सरस्वती, राजाराममोहनरायः, महात्मागान्धी, रवीन्द्रनाथठाकुरप्रभृतयः। एते प्रगतिशीलविचारधारायाः





समर्थका आसन्। नार्यः सुशिक्षिताः स्युः, समाजे तासां स्थानाम् आदरास्पदं भवेत्। तासु अन्धविश्वासादयः कुप्रवृत्तयः निरस्ता भवेयुः, तासु जागरणं स्यात्। ताः गृहकार्येण समवेत बाह्यकार्येषु, शिक्षाक्षेत्रे, व्यापारक्षेत्रे, अन्येषु शिल्पकलादि–कार्येषु च दक्षा भवेयुः।

एतेषां महापुरुषाणां प्रयत्नेन सती–प्रथा, बहुविवाह प्रथा, बाल–विवाहप्रथा प्रभृतयः कुप्रथाः समाप्तप्राया एव।

एतैः कृतभूरिप्रयासैः परिमार्जिते समाजे एताः नार्यः आगत्य समाजस्य राष्ट्रस्य च दिव्यस्वरूपं प्रदर्शितवत्यः।

सुप्रसिद्धा समाजसेविका रोमन् क्लाथेलिक् सम्प्रदायस्य सन्यासिनी मदरटेरेसा इति नामधेया काचन नारी आसीत्।

1950 तमे संवत्सरे "मिशनरीस् आफ् चारिटि" नामकसेवासंस्थायाः स्थापना कलकत्तानगर्यां स्थापितवती।

अस्याः संस्थायाः केन्द्राणि आभारते दृश्यतेऽस्माभिरिति। एतेषु केन्द्रेषु अनाथेभ्यः, अस्वस्थेभ्यः, दरिद्रेभ्यः च सर्वविधव्यवस्था कल्पिता अस्ति 45 वर्षाणाम् अपेक्षया अधिककालम् एषा सेवा कृतवती। दीनेषु देवं भावयन्ती सा सेवां कुर्वती च जीवितवती। विश्वे 27 देशेषु 600 शताधिकाः अस्याः सेवासंस्थायाः सेवानिरताः सन्ति। विरक्ताभ्यः महिलाभ्यः "मिशनरीस् आफ चारिटिस्" संस्था कल्पिता आसीत् 4000 सहस्राधिकाः संख्यकाः सेविकाभ्यः सेवानिरताः सन्ति। न केवलं महिलानां कृते किन्तु पुरुषाणां कृतेऽपि 1962 तमे संवत्सरे "मिशनरि ब्रदर्स आफ चारिटि" इति संस्था संस्थापितवती तेरेसा 1977 तमे संवत्सरे रोमदेशे "ब्रदर्स आफ दि वर्ल्ड" नामक संस्था स्थापितवती अनाथशिशूनां रक्षणाय "शिशुभवनम्" नामकसंस्थामारब्धवती। तेन तासां समाजनिर्माणे योगदानं सुतरां दृश्यते।

23 अप्रैल 1858 महाराष्ट्र–प्रान्ते प्रादुर्भूतवती पण्डितारामाबाई नामधेया भारतीय ईसाईसमाजसुधारिका एका अन्यतमा सामाजिककार्यकर्त्री आसीत्।

नारीणामुत्थानाय न केवलं भारतस्य अपितु "इंग्लैंड" देशस्यापि यात्रा 1881 तमे संवत्सरे कृतवती तस्मिन् "आर्य महिला सभा" या: संस्थापना अपि सŒजाता। अथ च वैदिकसाहित्यस्य जगति ब्रह्मवादिन्यः विदुष्यः गार्गी इति नाम बहुप्रसिद्धम्। एतस्याः पितुः नाम वचक्नुः। एतस्य पुत्री इति कारणेन एतस्याः वाचक्नवी इत्यपि नामस्ति।

एतस्याः याज्ञवल्क्येन सम्वादः सŒजातः स संवादस्तावद् अवगीति–ध्वंण याज्ञवल्क्येन सह वादं कर्तुम् आरब्धवती। भगवन्, एतानि सर्वाणि पार्थिववस्तूनि जले सन्ति किंतु जलं कस्मिन् अस्ति? इति पृष्टवती। जलं वायौ सम्मिलितमस्ति याज्ञवल्क्यः उत्तरं दत्तवान्। एवं वादः प्रतिवादो: वायोः, आकाशस्य, अन्तरिक्षस्य, गन्धर्वलोकस्य, आदित्यलोकस्य, चन्द्रलोकस्य, नक्षत्रलोकस्य, देवलोकस्य, इन्द्रलोकस्य, प्रजापतिलोकस्य विषये अभवत्। प्रश्नोत्तराणि अभवत्। याज्ञवल्क्यः तासां प्रश्नानां समुचितमुत्तरं ददाति स्म।

तेन तयोः संवादेनोदयायाति यत् नार्यः पुरुषाः च भयमुक्ता जिज्ञासायुक्तेन प्रश्नाः करोतु येन आनुरिकतायाः आत्मिष्ठतायाश्च विकासः स्यात् तदा समाजस्य कृते नवीनं नूतनं च ज्ञानमायाति तेन न केवलं समाजस्य निर्माणमपितु राष्ट्रस्यापि निर्माण भविष्यतीति नायं सन्देहः।





# ANALYSIS OF THE NYĀYA-VAIŚEṢIKA THEORY OF RĀMAKṚṢṆA BHAṬṬA'S TARKACANDRIKĀ WITH SPECIAL REFERENCE TO SAMAVĀYA

**Kushal Kumar Khajanchi**

**Abstract:**

Samavāya are the sixth and final substance in the list of substances of the Vaiśeṣika tradition. Samavāya is a type of relationship. In addition to Samavāya, the Nyāya-Vaiśeṣika school acknowledges Saṁyoga, Svarūpa etc. In this article, the topic of Samavāya is a special matter of Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā. The discussion of the indication, characteristic, examples etc. can be seen in his text. Although Ācārya Viśwanātha has objected to the unity of the Samavāya, such objections are not found in the writings of Rāmakṛṣna Bhaṭṭa. Tarkacandrikā written by Rāmakṛṣna, is a compendium on the philosophy of Nyāya-Vaiśeṣika. The author discusses the various decisions of the theory of Nyāya-Vaiśeṣika philosophy from his own point of view, which gives the spatiality of his book. While reading his book, there are some similarities between the words of other prominent similar philosophical texts, but the picture of one's own

is not less. He is especially a philosopher of the Navvyanyāya tradition.

**Key words:**

*Ayutasiddha, Comparison, Dravya, Inference, Padārtha, Perception, Sambandha, Testimony.*

## I. Introduction:

Nyāya is a realistic philosophy, mainly based of logic. It is also system of epistemology. Vaiśeṣika develops metaphysics and ontology. According to Nyāya there are four methods of knowledge, these are perception or pratyakṣa, inference or anumāna, comparison or upamāna and testimony or śabda. According to the Vaiśeṣika philosophy, Samavāya is one of the most special substance. Nyāya recognizes sixteen categories and includes all the seven categories of the vaiśeṣikas in one of them called prameya or the knowledge. Therefore, according to the Vaiśeṣika, Prameya is the chief.

After that the two older Indian philosophical traditions, the Nyāya and the Vaiśeṣika, developed in parallel until, at some point in the 11th or 12th century, they merged to from a new school, called Navyanyāya. Navyanyāya techniques proved to be so versatile that they were employed, not just by philosophers, but also in poetics, linguistics, legal theory and other domains of medieval





Indian thought. The foundational text of this school was Gaṅgesa's Tattvacintāmaṇi. Also, reaching with the heights works of Raghunātha, Jagadīsa, Gadādhara, Viśvanātha, Annaṁbhaṭṭa, Keśavamiśra, Rāmakṛṣṇa Bhaṭṭa etc.

## II. The relationship of *Tarkacandrikā* with nyāya-vaiśeṣika philosophy:

The indications of compendium have been clearly mentioned in the 'Parāśara Upapurāṇa'—

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितैः।।

Such is the same text of the compendium of Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā of Nyāya-Vaiśeṣika philosophy. At the beginning of the book, the prostration of Gaṇeśa is offered. Remembering the sages like Gautama etc., this book, written by the author, is a brilliant source of its own interpretive style, even if the compendium is equivalent to other similar books.

Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā written on the book Nyāya-Vaiśeṣika philosophy is a remarkable unpublished addition. Perception (Pratyakṣa), inference (Anumāna), comparison (Upamāna) and testimony (Śabda) are discussed in detail here. In the explanation of the chapter on inference, the author has mentioned exactly about the treatise (kārikā) of Bhāṣāparicchedaḥ.

Indian thought. The foundational text of this school was Gaṅgesa's Tattvacintāmaṇi. Also, reaching with the heights works of Raghunātha, Jagadīsa, Gadādhara, Viśvanātha, Annaṁbhaṭṭa, Keśavamiśra, Rāmakṛṣṇa Bhaṭṭa etc.

## II. The relationship of *Tarkacandrikā* with nyāya-vaiśeṣika philosophy:

The indications of compendium have been clearly mentioned in the 'Parāśara Upapurāṇa'—

शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितैः।।

Such is the same text of the compendium of Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā of Nyāya-Vaiśeṣika philosophy. At the beginning of the book, the prostration of Gaṇeśa is offered. Remembering the sages like Gautama etc., this book, written by the author, is a brilliant source of its own interpretive style, even if the compendium is equivalent to other similar books.

Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā written on the book Nyāya-Vaiśeṣika philosophy is a remarkable unpublished addition. Perception (Pratyakṣa), inference (Anumāna), comparison (Upamāna) and testimony (Śabda) are discussed in detail here. In the explanation of the chapter on inference, the author has mentioned exactly about the treatise (kārikā) of Bhāṣāparicchedaḥ.





word 'Nityaprāptiḥ' for the signs of Samavāya. So it can be said that samavāya are eternal and related. Various Navyanyāya philosophers have given the definition of inherence from their own point of view. Annaṁbhaṭṭa says 'नित्यसम्वन्धः समवायः, अयुतसिद्धवृत्तिः।' Finally, Annaṁbhaṭṭa gave a beautiful explanation of the word. 'Ayutasiddhabrtti' in clear language. He says that 'ययोर्द्वयोर्मध्ये एकम् अविनश्यद् अपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ।'[6] Keśavamiśra discussed on samavāya 'अयुतसिद्धयोः सम्वन्धः समवायः।'[7] Samavāya or inherence are not excluded from the point of view of Ramakṛṣṇa Bhaṭṭa, the author of Tarkacandrikā. He is a renowned Naiyāyik of the seventeenth century. Samavāya have been explained from his point of view 'अपृथक् सिद्धयोः सम्वन्धः समवायः।'[8]

## IV. The knowledge of causation with Samavāya

Causation is an important role in all branches of Indian philosophy. The conception of reality of every school of Indian philosophy depends upon the theory of causation. Mahāmahopādhyāya Pandit Maheśa Chandra Nyāyaratna says that importance of causality is logical and metaphysical are two types. The concept of Samavāya seems to have evolved in connection with the theory of causation. It explains the existence of an effect in its cause or in other words, the existence of one substance in another substance in such a way that

both of them occupy the same space. Kaṇāda does not speak of qualities, actions or universals to be residing in their substances by the relation of inherence. He defines inherence as "that which produces in respect of cause and effect the concept of this being contained in that".[9] The inherence thus makes the relation of cause and effect as that of the container and the contained. It appears that once the relation of inherence was established in connection with the theory of causation, its scope was extended to the existence of qualities, actions or universals in their substances. Ācārya Viśvanātha declares that inherence is occupied as a separate category for the behalf of lāghava. He points out if an effect were held to be existing in its cause or qualities etc., existing in their substances by the very nature of their substrata (instead of inherence), then the substrata being endless, relations would also be endless. It would, thus, lead to a unnecessary multiplication of assumptions, hence it was better to accept one separate relation called Samavāya.[10]

### V. Saṁyoga and Samavāya

Although the saṁyoga is called relation in the philosophy of Nyāya-Vaiśeṣika, there are many differences between saṁyoga and samavāya.





1. Samavāya is a distinct substance. But the saṁyoga was not called matter. saṁyoga has been said to include quality.

2. Samavāya have been called perpetual relations. If the samavāya is impermanent, its origin is also accepted from three reasons. Samavāya are not destroyed as permanent and individual.

The saṁyoga is impermanent. Where there is a saṁyoga, the section at the end is seen. For example, the saṁyoga of the crow in the tree or the saṁyoga of the hand and the book is destroyed at the end of the division. On the other hand, the samavāya relationship between the kapāla and the pot does not end there.

3. The saṁyoga is in both products. But a samavāya relationship can be between two substances or between two substances that are not both.

4. Saṁyoga is abnormality. That is to say, the authority in which the saṁyoga exists also lacks it. For example, if there is a monkey-saṁyoga in a tree, it can be said that there is a lack of monkey-saṁyoga. Because there is no monkey-saṁyoga at the top of the tree. But it is about the spread of samavāya. There are forms of samavāya. But it cannot be said which part of the pot has form, which part lacks form. Many more differences are known.

## VI. Samavāya is criticized by different philosopher

The Nyāya-Vaiśeṣika doctrine of Samavāya was very much criticized by many thinkers. Samavāya have been not recognized in any other Indian philosophy other than Prabhākar Mīmāṁsā and Nyāya-Vaiśeṣika.

Prabhākar acknowledged the Samavāya. But according to him, Samavāya can be permanent and impermanent. If the ayutasiddha substances are eternal, their Samavāya will be eternal. If the ayutsiddha substances are eternal and impermanent or impermanent, their Samavāya will be impermanent. Prabhākar acknowledges that Samavāya are many.[11]

According to Nyāya-Vaiśeṣika, Samavāya is eternal and one. According to them, it is a fault to acknowledge different Samavāya in different instances. Guṇa in Dravya, Jāti in Vyakti, Viśeṣa in Nityadravya, so everywhere in this container, this content is such a monotonous knowledge. There is no difference in that knowledge. Therefore, the Vaiśeṣika do not accept the Samavāya as a Saṁyoga.[12]

Śaṅkarācārya and others have raised various objections against Samavāya. They say, what is meant by ayutsiddha substance? If ayutsiddha means matter-does not separate, then their relationship cannot be the fulfillment of Samavāya in the absence of dharmī because dharmī is not perfect. Again, if it means





ayutsiddha substance - the two substances that are inexplicably perfect, then their relationship cannot be the perfection of the Samavāya because the two religions are not different. It is reasonable to acknowledge their relationship only if the two are different.[13]

Moreover, the relations between the two Samavāya are very different and their Samavāya are also very different. Vedantist asks: In order to associate two very different relations (such as pot and its form) one has to accept very different Samavāya, in order to associate Samavāya in those two very different relations one has to accept another Samavāya in addition to oneself. In order to make a relationship between the two, one has to accept another Samavāya. In this way, fault will arise. So Samavāya are imperfect.[14]

In response to this, it can be said that even though the Vaiśeṣika community acknowledges the additional relation called Samavāya, it does not call it adopted, it calls it independent. Just as a Saṁyoga is made up of two relatives, so a Samavāya is not connected to another by such a relationship. Where the Samavāya is, it is Svarūpa Samvandha, not about Saṁyoga or Sāmānya.[15] So, Samavāya do not wait for any other relationship. So the objection of non-compliance is not reasonable.

In Bhāṭṭa Mīmāṁsā and Vedānta philosophy, identity has been recognized instead of Samavāya. According to them, tādātmya means discrimination or discrimination-tolerant unity, so in some part difference, in some part unity. In Nyāya-Vaiśeṣika philosophy, tādātmya means unity. According to Bhāṭṭa and Vedānti, the relationship between the two substances cannot be Samavāya. In this case, the pot is the container and the form is the content. So pots and forms are not identical, since the same substance does not have a container-content. Again, pot and form are not completely different, since those two do not exist separately. So the relationship between pot and form is Bhedābheda.

Nyāya-Vaiśeṣika says that Bhedābheda is against each other, so it cannot be in the same container. So Samavāya are undeniable.[16]

## VII. Conclusion:

Based on the above study it can be concluded that directly or indirectly everything in Nyāya-Vaiśeṣika philosophical theory depends on Samavāya and at the same time the discussion on inherence (Samavāya) in Rāmakṛṣṇa Bhaṭṭa's Tarkacandrikā is not left out. Each and every Dravya in this universe possesses Guṇa and Karma, relation between Dravya and Guṇa as well as between Dravya and its Karma are related with each





other by Samavāya. Advaita Vedāntins do not accept the difference between Dravya and Guṇa, according to them Guṇa is the Dravya itself. They said that without dualism there is no inherence. However, Nyāya-Vaiśeṣikas are realists and they are also pluralists so the plurality of things may be related or not. It can also be temporal or substantial.

**End notes:**

1. Bhāṣāparicchedaḥ, Kārikā-71
2. Tarkacandrikā of Rāmakṛṣna Bhaṭṭa
3. Vaiśeṣika Sūtra, 7.2.26
4. The Prasastapada Bhashya with Commentary Nyayakandali of Sridhara, Vindhesvari Prasad Dvivedin, p-14
5. Karikavali of Visvanatha Pancanana with the Commentaries Muktavali, Dinkari and Ramarudri, Ananta Sastri, p-84
6. Tarkasaṁgraha-Dipika, Srinarayanachandra Goswami, p-599
7. Tarkabhāṣā, S. R. Iyer, p-215
8. Tarkacandrikā of Rāmakṛṣna Bhaṭṭa
9. Bhāṣāparicchedaḥ, Pancanana Sastri, p-71
10. The Philosophy of Nyāya-Vaiśeṣika, Sastri, p-377-378
11. Bhāṣāparicchedaḥ, Pancanana Sastri, p-79
12. Ibid., p-75
13. Vaiśeṣika O Prabhākara Sammata Samavāya, Dinanatha Tripathi, Tattva O Prayoga, 2nd Chapter, 2nd Part, p-28-29
14. Ibid., p-31
15. Bhāṣāparicchedaḥ, Pancanana Sastri, p-79
16. Saṭīkaḥ Tarkasaṁgrahaḥ Adhyāpanāsahitaḥ, Narayanachandra Goswami, p-92

**References:**

1. Athalye, Yashwant Vasudev & Bodas, Mahadev Rajaram, ed. *Tarka-saṁgraha of Annambhaṭṭa*. Bombay: Bombay Sanskrit and Prakrit Series. No. LV, 1930.

2. Bhattacharya, Panchanana, ed. *Bhāṣāparicchedaḥ*. Kolkata: Mahabodhi Book Agency, 2016.
3. Chatterjee, Satischandra & Datta, Dhirendramohan. *An Introduction to Indian Philosophy*. Kolkata: University of Calcutta, 2011.
4. Dvivedin, Vindhesvari Prasad, ed. *The Praśastapāda Bhāshya with Commentary Nyāyakandali of Śridhara.* Delhi: Sri Satguru Publications. 1984.
5. Iyer, S. R., ed. *Tarkabhāṣā of Keśava Miśra*. Varanasi: Chaukhambha Orientalia, 1979.
6. Jha, Ganganatha, trans. *Padārthadharmasangraha of Praśastapāda with the Nyāyakandalī of Śrīdhara.* Benares: E. J. Lazarus and Co, 1916.
7. Shastri, Ananta, ed. *Kārikāvalī of Viśvanātha Pancānana with the Commentaries Muktāvalī, Dinakarī and Rāmarudrī.* Bombay: Tukaram Javaji, 1916.






## गौतमीयसूत्रे श्रुतेः प्रामाण्यम् – एको विमर्शः

(निबन्धकारः दिलीपः पण्डाः, सहकारी अध्यापकः, संस्कृतविभागस्य, हीरालाल-मजुमदार-मेमोरियाल-कलेज-फर्-उइमेन्- इत्यस्य महाविद्यालयस्य। mail: dlpkmrpanda@gmail.com)


**प्रबन्धसारः** - "पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः।।
चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यञ्च सर्वं वेदात्प्रसिध्यति।।" इति (मनुसंहिता-१२।९४,९७)

अतोऽभ्युदयनिःश्रेयसिद्धिहेतुकस्य धर्मस्य परमार्थभूतसिद्धान्तनिचयावगतेः साधनभूतो वेद एव धर्मसर्वस्वमिति शास्त्रज्ञानजुषां विदुषां मतम्। नैवास्माकं साधारणानां मनुजनूनाम्, अपि तु देवानां पितृणामपि वेद एव सनातनं चक्षुरिति विदां भणितिः। 'विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः' इति बह्वृक्प्रातिशाख्यम्। आचार्यसायणस्तु अपौरुषेयवाक्यं वेद इत्याह। 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद' इति भाष्यभूमिकायामुक्तम्। अलौकिकपदेन प्रत्यक्षस्य अनुमानस्य च ग्रहणं नैव भवति। भाष्यकाराणां मतानुसारं ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः कलञ्जभक्षणादिरनिष्टपरिहारहेतुः वेदव्यतिरेकेण अनुमानसहस्रेणापि गन्तुं न शक्यते। तस्मादलौकिकोपायबोधको वेद इति अदुष्टं लक्षणं भवितुमर्हति। तत्प्रमाणमपि तत्रैव प्रतिपादितम्

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।" इति।

उक्तप्रकारेण वेदस्य लक्षणं बहुधा प्रतिपादितम्। परन्तु लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः इति नैयायिकानां मतम्। तस्मान्न केवलं लक्षणेन अपि तु वस्तुसिद्धिं प्रति प्रमाणमपि कारणं भवति। वाक्यं च प्रमाणं भवति तदैव यदा वाक्यस्य अर्थावबोधे संशयो न स्यात्। यस्य वाक्यस्य अर्थज्ञानं पूर्वं न जातम् अनधिगतं वा तदपि वाक्यं भवति प्रमाणम्। पुनश्च कस्यापि वाक्यस्य अर्थावबोधे यदि न कोऽपि बाधो न जायते तदपि वाक्यं भवति प्रमाणम्। तथा चोक्तम् – 'असन्दिग्ध-अनधिगत-अबाधितार्थबोधकं वाक्यं प्रमाणम्' इति। परन्तु ये खलु वेदविरोधिनः सन्ति ते वेदस्य प्रामाण्यं नाङ्गीकुर्वन्ति। तेषां वचोविन्यासेन ते वेदस्य प्रामाण्यं खण्डयित्वा स्वकीयं मतं समुपस्थापयन्ति। वेदप्रामाण्यमनङ्गीकुर्वन्ति ये चार्वाकादयस्तेषां वचोविन्यासं शास्त्रवारिप्रोक्षणेन हेलया प्रक्षालयन्ति नैयायिकाः। सांख्यादिभिर्यथा वेदस्य प्रामाण्यमुररीकृतं तद्वत् नैयायिका अपि शब्दप्रमाणद्वारा वेदस्य प्रामाण्यं स्वीकुर्वन्ति। वेदस्य प्रामाण्यं प्रतिपादयता न्यायसूत्रकारेण महर्षिणा गौतमेन प्रथमतः नास्तिकमतानुसारं पूर्वपक्षस्य मतमुपस्थापयता सिद्धान्ततया तस्य खण्डनद्वारेण स्वकीयं मतमपि प्रकटितम्। तदेव ग्रन्थेऽस्मिन् वैशद्येन विचार्यते।


कुञ्चीशब्दाः – अनृतम्, व्याघातः, पुनरुक्तः, कर्मवैगुण्यं, कर्तृवैगुण्यं, साधनवैगुण्यम्।

**उपक्रमः** भारतीयदर्शनशास्त्रेषु तथा चतुर्दशविद्यास्थानेषु न्यायशास्त्रं भवति अन्यतमम्। तदुक्तं याज्ञवल्क्यशिक्षायाम्

"पुराणन्यायमीमांसा-धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।" इति

(याज्ञवल्क्यशिक्षायाम् – आ./३)

आन्वीक्षिकी इति न्यायशास्त्रस्य अपरमभिधानम्। प्रमाणादिविषयैः सह शास्त्रेऽस्मिन् वेदस्य प्रामाण्यम्, आत्मनो नित्यत्वं, मोक्षः तथा अन्येऽपि वेदमूला विषयाः प्रतिपादिता दृश्यन्ते। तस्मादियं न केवलं तर्कविद्या अपि तु

तदापि नित्येन सर्वज्ञेन परमेश्वरेण वेदः प्रणीत इति ज्ञायते। आचार्येण कणादेन उक्तं "बुद्धिपूर्वा वाक्यकृतिर्वेदे" (६/१/१) इति। अर्थात् आचार्यकणादनये तु लौकिकवाक्यरचनावत् वेदवाक्यस्य रचनापि बुद्धिपूर्वा अर्थात् वेदार्थविषयकज्ञानजन्या। तस्मान्महर्षिकणादनयेऽपि शाश्वतधर्मगोप्ता सर्वज्ञः परमेश्वर एव धर्मप्रतिपादकस्य वेदस्य प्रथमो वक्ता तस्य प्रामाण्यप्रयुक्तत्वेन एव वेदस्य प्रामाण्यम्, परमेश्वरव्यतिरिक्तस्य अन्यस्य कस्यापि वेदोपदेष्टृरूपेण ग्रहणस्याशक्यत्वादिति शम्।

**सहायकानां ग्रन्थानां विवरणम् –**


१. वैदिकवाङ्मयस्येतिहासः, आचार्यः जगदीशचन्द्रः मिश्रः, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, पुनर्मुद्रितसंस्करणम्, २००२।
२. वेदभाष्यभूमिकासंग्रहः, आचार्यः बलदेवः उपाध्यायः, चौखम्भा संस्कृत संस्थानम्, वाराणसी, द्वितीयसंस्करणम्, १९८५।
३. आश्वालायन-श्रौतसूत्रम्, अमरकुमार चट्टोपाध्यायः, दि एशियाटिक सोसाइटि, कलिकाता, प्रथमप्रकाशः २००२।
४. वेदपरिचयः, डः योगीराजः वसुः, फार्मा के-एल्-एम् प्राइभेट लिमिटेड, कलिकाता, द्वितीयसंस्करणम्, १९७०।
५. न्यायपरिचयः, महामहोपाध्यायः श्रीफणिभूषणः तर्कवागीशः, द्वितीयसंस्करणम्।
६. मीमांसा-दर्शनम्, (प्रथमः खण्डः) महामहोपाध्यायः श्रीभूतनाथः सप्ततीर्थः, संस्कृत बुक् डिपो, कलिकाता, पुनर्मुद्रणं १४१६ वङ्गाब्दः।
७. न्यायमञ्जरी, सम्पादकः के. एस्. वरदाचार्य्यः, प्राच्यविद्यासंशोधनालयः, मैसुरु, प्रथमसंस्करणम्, १९६९।






# "..बुद्धेः परतस्तु सः"[i] इति गीतोक्तेरद्वैतविशिष्टाद्वैताचिन्त्यभेदाभेददिशा समीक्षणम्

प्रबन्धप्रणेता- त्रिदिव-राय-मण्डलः

## भूमिका-

ब्रह्म विहाय अन्यदशेषस्य अनित्यमवगम्य स्त्र्यन्नपशुक्षेत्रस्रक्चन्दनादैहिकेभ्यः त्रिदिवाद्यामुष्मिकेभ्यश्च विषयेभ्यः विरक्तो भूत्वा शमदमोपरतितितिक्षासमाधानश्रद्धापूर्वकं जननमरणाद्यशेषानर्थरूपसंसाराग्निना सन्तप्तः मुक्त्युपायभूतात्मतत्त्वविज्ञानाय योग्यः मुमुक्षुः प्रशान्तचित्तः जितेन्द्रियः आध्यात्मिकाधिदैविकाधिभौतिकविघ्ननिवृत्तिकामः मिथ्याज्ञानजन्यवासनां सकारणेन सह बाधयितुं परमात्मानञ्च विज्ञातुं दीप्तशिरा इव श्रोत्रियं ब्रह्मनिष्ठं गुरुम् अनुसरति। "शान्तो दान्त उपरतो तितिक्षुः समाहितो भूत्वा"[ii], "रसोऽप्यस्य परं दृष्ट्वा निवर्तते"[iii], "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[iv], "तानि सर्वाणि संयम्य युक्त आसीत मत्परः"[v], "तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः"[vi] चेत्यादिश्रुतिभ्यः स्मृतिभ्यश्च अवगम्यते यत् इन्द्रियनियमनपूर्वकं परमात्मा ज्ञातुं शक्यः। पापाचारस्य कामस्य समूलनाशाय न केवलं बाह्येन्द्रियजयः, मनसः बुद्धेरपि जयः कर्तव्यः। यद्यपि कष्टेन बाह्येन्द्रियाणां नियमनं शक्यम्, किन्तु अन्तरिन्द्रियगततृष्णायाः त्यागोऽतीवदुःसाध्यः तथापि "रसोऽप्यस्य परं दृष्ट्वा निवर्तते"[vii] इत्यत्र परमात्मदर्शनस्य तृष्णात्यागसाधनत्वेन कथितत्वात् तादृशम् अशेषक्लेशरहितं विशुद्धमात्मानं देहेन्द्रियमनोबुद्ध्यादिभ्यः पृथक्कृत्य दर्शयितुं भगवता श्रीकृष्णेन उच्यते यत्

**"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**
**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥"**[viii] इति।

## शाङ्करभाष्याभिप्रायः

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ज्ञानेन्द्रियाणि परिच्छिन्नजडस्थूलदेहात् श्रेष्ठानि। यतो हि देहादिभ्यः स्थूलजडपरिच्छिन्नविषयेभ्यः व्यापकानि प्रकाशकानि सूक्ष्माणि च भवन्ति। इन्द्रियाणाञ्च प्रवर्तकत्वात् सङ्कल्पविकल्पात्मकं मनः तेभ्य इन्द्रियेभ्यः श्रेष्ठम्।

ननु इन्द्रियाभिन्नं मनः खलु ? स्मर्यते च "मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति"[ix] इति भगवद्वचनमिति

चेन्नेति ब्रूमः। अस्मिन् भगवद्वाक्ये मनः षष्ठं येषां ज्ञानेन्द्रियाणां तानि मनःषष्ठानि इत्येवं विग्रहानुसारेण अन्तःकरणम् आदाय षड्संख्यावन्ति इन्द्रियाणि इति अन्तःकरणस्य इन्द्रियाभावेऽपि चक्षुकर्णनासिकात्वग्जिह्वाख्यानां ज्ञानेन्द्रियाणां षड्संख्यापूर्तियोग्यतया "मनःषष्ठानीन्द्रियाणि" इत्यादिगीतोक्तेरनिन्द्रियव्यवस्थापकत्वम्।

ननु सजातीयगतसंख्यापूर्तिः सजातीयेनैव इति नियमश्रवणात् मनसः इन्द्रियत्वमेवेति चेन्नेति वदामः। यत्र यत्र संख्यापूर्तिः तत्र तत्र सजातीयत्वमेव इति व्याप्तिः व्यभिचारग्रस्ता। अस्याः व्याप्तेः व्यभिचारस्थलानि धर्मराजाध्वरीन्द्रैः वेदान्तपरिभाषायां कथ्यते यत् "यजमान पञ्चमा ईडां भक्षयन्ति"[x], "वेदानध्यापयामास महाभारतपञ्चमान्"[xi] चेत्यादि। यजमानस्य ऋत्विक्त्वाभावेऽपि ऋत्विग्गतपञ्चत्वसंख्यापूरणार्थम् अनृत्विजोऽपि यजमानस्य ऋत्विक्त्वव्यपदेशः। अपि च वेदगतपञ्चत्वसंख्यापूरणाय अवेदस्य अपि महाभारतस्य पञ्चमवेदाख्या प्रदीयते।

ननु "इन्द्रियाणां मनश्चास्मि"[xii] इत्यत्र भगवान् श्रीकृष्णः स्पष्टमेव मनसः इन्द्रियत्वम् अवदत् इति चेदपि मनसः अनिन्द्रियत्वमेव। यतो हि तस्मिन्नेव प्रसङ्गे "नक्षत्राणामहं शशी"[xiii] इत्युक्तत्वात्। यदि इन्द्रियेषु मनः प्रधानमित्युच्यते तर्हि नक्षत्रेषु चन्द्र एव प्रधानमित्येवमङ्गीकार्य्यम्। किन्तु नक्षत्रेषु चन्द्रस्य प्राधान्यम् अप्रसिद्धमेव। एवञ्च श्रुतिषु अपि इन्द्रियेभ्यः पृथक्त्वेन मनसः ग्रहणं श्रूयते। तथा च श्रुतयः यत् "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"[xiv], "बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुः विषयास्तेषु गोचरान्॥"[xv] चेत्याद्याः। तस्मात् सङ्कल्पविकल्पात्मकम् अन्तःकरणम् इन्द्रियेभ्यः भिन्नं श्रेष्ठञ्च भवति।

सङ्कल्पविकल्पादीनां मनोधर्मत्वात्, मनोधर्माणां च निश्चयपूर्वकत्वात् निश्चयात्मिका बुद्धिः प्रकृष्टा भवति। बुद्धेरपि साक्षित्वात् द्रष्टृत्वात् च परमात्मा श्रेष्ठः, यं देहिनं देहेन्द्रियादिषु अधिष्ठितः कामः मोहयति स परमात्मा। एतदेव कठोपनिषदि श्रूयते यत्

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥"[xvi] इति।

ननु श्रुतौ इन्द्रियेभ्योऽपि अर्थानामर्थात् विषयानां श्रेष्ठत्वमुक्तम्, भगवता तु अर्थेभ्य इन्द्रियाणां श्रेष्ठत्वं गदितम्। इत्यतः श्रुतिस्मृत्योः विरोधः, श्रुतिस्मृत्योः विरोधे श्रुतिरेव बलवतीति कारणात् भगवत्कथनं न युक्तियुक्तमिति चेन्न, अर्थेभ्यः विषयेभ्य इन्द्रियाणां परत्वे श्रुतेरभिप्रायात्। अतः भगवदुक्तं श्रुत्या न विरुध्यते।





**रामानुजभाष्याभिप्रायः**

आत्मज्ञानावाप्तौ इन्द्रियाणि मुख्यप्रतिबन्धकानि भवन्ति। इन्द्रियेषु विषयभोगरतेषु सत्सु आत्मज्ञानानुशीलनम् अशक्यम्। इन्द्रियेषु विषयभोगविरतेषु अपि विषयासक्तं मनः चेत् ज्ञानावाप्तिः न सम्भवति इति कारणात् इन्द्रियेभ्यः मनः परम्। सङ्कल्पविकल्पात्मकमनसि विषयभोगविमुखे सत्यपि निश्चयात्मिका बुद्धिः यदि आत्मज्ञानविपरीतसांसारिकविषयासक्ता भवति तर्हि आत्मज्ञानं न सम्भवति इति कारणात् प्रतिबन्धकत्वेन मनसः बुद्धिः श्रेष्ठा। इन्द्रियादिबुद्ध्यन्तेषु विषयभोगोपरतेषु सत्सु अपि रजोगुणोद्रेकरूपः कामः समुत्पन्नश्चेत् इन्द्रियमनोबुद्धीनां नियन्त्रणम् अशक्यम्। यतो हि काम एव इन्द्रियमनोबुद्ध्यादीन् नियोजयति। अतः बुद्धेरपि कामः श्रेष्ठः।

**बलदेवविद्याभूषणभाष्याभिप्रायः**

परब्रह्मज्ञानसाधनानुष्ठानादौ इन्द्रियनियमनं कार्यम्। इन्द्रियानियमने सति मनसः नियमनमशक्यम्। स्वप्नावस्थायाम् इन्द्रियेषु नष्टेषु अपि जाग्रदवस्थायामिन्द्रियप्रवर्तकं मनः स्वप्नावस्थायां न नश्यति। अत इन्द्रियेभ्यः मनः श्रेष्ठम्। मनसोऽपि विज्ञानरूपिणी बुद्धिः श्रेष्ठा भवति। सुषुप्त्यवस्थायां मनसि नष्टेऽपि विज्ञानाकाराकारितबुद्धिः न नश्यति। अत एव ज्ञानं भवति यत् सुखमहम् अस्वाप्सम् इति। एवञ्च नियश्चात्मिकाबुद्धिवृत्त्या मनोवृत्तेः प्रसारत्वात् मनसोऽपि बुद्धिः ज्यायसी भवति। ज्ञानाभ्यासेन बुद्धौ नष्टायां सत्यामपि यः चेतनः पुरुषः सर्वदैव विनश्वरः सन् विराजते स जीवात्मा बुद्धेरपि प्रकृष्टः।

**अस्मत्समीक्षणम्**

"इन्द्रियेभ्यः परं मनः"[xvii] इति भगवद्वचनेन सह "अर्थेभ्यश्च परं मनः"[xviii] इति श्रुत्या विरोधः परिलक्ष्यते। अस्य विरोधस्य समाधानाय मधुसूदनसरस्वतीभिः कथितं यत् "'इन्द्रियेभ्यः परा ह्यर्था' इति स्थाने अर्थेभ्यः पराणि इन्द्रियाणि इति विवक्षाभेदेन भगवदुक्तं न विरुध्यते"[xix] इति। अर्थात् अर्थेभ्यः श्रेष्ठानि इन्द्रियाणि इति मधुसूदनमतम्। अत्र रामानुजाचार्यैः किमपि मतं न प्रकटितम्। किन्तु बलदेवविद्याभूषणाचार्यैरुक्तं यत् "अस्यार्थः- इन्द्रियेभ्योऽर्थाः विषयाः तदाकर्षितत्वात् पराः प्रधानभूताः"[xx] इति। अत्र मधुसूदनसरस्वतीबलदेवविद्याभूषणयोः मतविरोधः लक्ष्यते। अत्र बलदेवविद्याभूषणमतमेव समीचीनं भाति। यतो हि श्रुतौ साक्षादुक्ते अर्थे विरपीतलक्षणया मधुसूदनसरस्वतीभिः विरपीतार्थस्वीकारोऽनर्थक एव। एवञ्च इन्द्रियाणि एव विषयान् प्रति धावन्ति, न तु विषया इन्द्रियाणि प्रति। अत

इन्द्रियापेक्षया विषयाणां श्रेष्ठत्वमवगम्यते।

वयं मधुसूदनसरस्वत्युक्तं मतं न स्वीकुर्मश्चेत् भगवच्छङ्करमतेन सह श्रुत्युक्तं न विरुध्यते। यतो हि "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परं मनः"[xxi] इत्यत्र भगवच्छङ्कराचार्यैरुच्यते यत् "स्थूलानि तावदिन्द्रियाणि, तानि यैरर्थैरात्मप्रकाशनाय आरब्धानि, तेभ्य इन्द्रियेभ्यः स्वकार्येभ्यः ते परा हि ह्यर्थाः सूक्ष्माः महान्तश्च प्रत्यगात्मभूताश्च"[xxii] इति। सूक्ष्मभूतेभ्य इन्द्रियाणि उत्पद्यन्ते इति कारणात् इन्द्रियापेक्षया सूक्ष्मभूतानि श्रेष्ठानि। अतः भगवच्छङ्करमतेन सह वस्तुतस्तु श्रुत्युक्तं न विरुध्यते।

"बुद्धेः परतस्तु सः"[xxiii] इत्यत्र भगवच्छङ्कररामानुजबलदेवविद्याभूषणाचार्याणां मतं परस्परं विरुध्यते। बुद्धेरपि परमात्मा प्रकृष्ट इति भगवच्छङ्करमतम्। बुद्धेः कामः श्रेष्ठ इति रामानुजमतम्। बुद्धेः जीवात्मा श्रेष्ठ इति बलदेवविद्याभूषणमतम्। विचार्यमाणे सति भगवच्छङ्करबलदेवविद्याभूषणमतयोरत्र सादृश्यं विद्यते इत्यवगम्यते, भगवच्छङ्करमतानुसारं जीवात्मनः परमात्माऽभिन्नत्वात्। "बुद्धेरात्मा महान् परः"[xxiv] इत्यस्यां श्रुतौ आत्मपदेन हिरण्यगर्भः ज्ञेयः। प्रथमः जीवात्मा हिरण्यगर्भ एव। किन्तु रामानुजेन सह भगवच्छङ्करबलदेवविद्याभूषणयोः विरोधः विद्यते। अत्र भगवच्छङ्करबलदेवविद्याभूषणयोः मतं ग्रहणयोग्यं भाति, कामस्य मनोधर्मत्वात्। कामस्य च मनोधर्मत्वे "कामः सङ्कल्पः विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव"[xxv] इति श्रुतिरत्र मानम्। मनस उपलक्षणतयाऽत्र प्रयोगेण मनसः ग्रहणेन कामादीनामपि ग्रहणं सञ्जातम्। यतो हि स्वबोधकत्वे सति स्वेतरबोधकत्वम् उपलक्षणलक्षणं ज्ञेयम्। यदि उच्येत- काममनसोः धर्मधर्मिभावे सत्त्वेऽपि मनस्सत्त्वे कामः न तिष्ठति तर्हि धर्मिणि सत्यपि धर्मस्य अनङ्गीकारः स्यात्। किन्तु यथा स्वामी भृत्यम् अपेक्षते तथा धर्मी अपि धर्ममपेक्षते, अन्यथा धर्मित्वहानिः। अतः धर्मिणि मनसि विद्यमाने अवश्यमेव धर्मः विद्यमानः स्यादेव। अतोऽग्नौ स्थिते अवश्यमेव प्रेक्षावन्तः दाहस्य अङ्गीकारं कुर्वन्ति। उन्मत्ता एव नाङ्गीकुर्वन्ति।

अतः "कामः सङ्कल्पो विचिकित्सा"[xxvi] इति श्रुत्यनुसारं कामादीनां मनोधर्मत्वाङ्गीकारे मनस उपस्थितौ कामादीनामपि उपस्थितिः, मनसोऽनुपस्थितौ कामादीनामपि अनुपस्थितिरङ्गीकार्या। एवञ्च मनस उपस्थितौ कामादीनामनुपस्थित्यङ्गीकारे तदनुपस्थितौ च कामादीनामुपस्थित्यङ्गीकारे श्रुतहानिरश्रुतप्रसङ्गश्च। अतः "सर्वेषु बुद्धिपर्यन्तेषूपरतेष्वपि इच्छापर्यायः कामो रजोगुणसमुद्भवो वर्तते चेत्, स एवैतानीन्द्रियादीन्यपि स्वविषयेषु वर्तयित्वा आत्मज्ञानं निरुणद्धि"[xxvii] इति रामानुजवचनं श्रुतिविरुद्धम् अत्यन्तमयुक्तं भातीति अस्मन्मतम्।





**उपसंहारः-**

शोधप्रबन्धेऽस्मिन् स्थूलदेहात् इन्द्रियाणाम्, इन्द्रियेभ्योऽन्तःकरणस्य, अन्तःकरणात् निश्चयात्मिकायाः बुद्धेः बुद्धेश्च परमात्मनः परत्वं परत्वे च यथायथं कारणानि प्रतिपादितानि। तत्रापि भगवच्छङ्कररामानुजबलदेवविद्याभूषणाचार्याणां मतानि उपस्थाप्य भगवच्छङ्करबलदेवविद्याभूषणोक्तमतयोः ग्रहणयोग्यत्वं योग्यत्वे च युक्तयः निगदिताः। अपि च अन्तःकरणस्य अनिन्द्रियत्वं प्रतिपाद्य विषयेन्द्रिययोः श्रेष्ठत्वविषये श्रुतिस्मृत्योः विरोधं प्रदर्श्य तद्विरोधश्च परिहृतः। एवमस्माभिरत्र दशोपनिषद्भाष्य-श्रीमद्भगवद्गीताभाष्य-ब्रह्मसूत्रभाष्य-गीताभूषणभाष्य-सारार्थदीपिका-गूढार्थदीपिका-वेदान्तपरिभाषा-पञ्चदशीनैष्कर्म्यसिद्ध्यादि-ग्रन्थपर्यालोकनेन सप्रमाणं यथामति स्वयुक्त्या परमात्मनः परत्वं प्रतिपादितमिति शम्।

i श्रीमद्भगवद्गीता- ३/४२
ii बृहदारण्यकोपनिषत्- ४/४/२३
iii श्रीमद्भगवद्गीता- २/५९
iv बृहदारण्यकोपनिषत्- २/४/५
v श्रीमद्भगवद्गीता- २/६१
vi श्रीमद्भगवद्गीता- २/६८
vii श्रीमद्भगवद्गीता- २/५९
viii श्रीमद्भगवद्गीता- ३/४२
ix श्रीमद्भगवद्गीता- १५/७
x लोकनाथ-चक्रवर्तिभिः महोदयैः अनुदिते व्याख्याते च वेदान्तपरिभाषाख्यग्रन्थे एतदेव उद्ध्रियते, पृष्ठाङ्कः- ६२
xi तत्रैव
xii श्रीमद्भगवद्गीता- १०/२२
xiii श्रीमद्भगवद्गीता- १०/२१
xiv मुण्डकोपनिषत्- २/१/३
xv कठोपनिषत्- १/३/३
xvi कठोपनिषत्- १/३/१०
xvii श्रीमद्भगवद्गीता- ३/४२
xviii कठोपनिषत्- १/३/१०
xix श्रीमद्भगवद्गीता(अष्टटीकोपेता), पृष्ठाङ्कः- १७९
xx श्रीमद्भगवद्गीता(गीताभूषणभाष्येण सारार्थवर्षिण्या च समलङ्कृता), पृष्ठाङ्कः- ११५
xxi कठोपनिषत्- १/३/१०
xxii श्रीमद्भगवद्गीता(वासुदेवानन्दस्वामिभिः व्याख्याता अनूदिता च), पृष्ठाङ्कः- ७७
xxiii श्रीमद्भगवद्गीता- ३/४२
xxiv कठोपनिषत्- १/३/१०
xxv बृहदारण्यकोपनिषत्- १/५/३
xxvi तत्रैव
xxvii श्रीमद्भगवद्गीता(शाङ्करभाष्याद्येकादशटीकोपेता), पृष्ठाङ्कः- ३४८





## परिशीलिताः ग्रन्थाः


1 अश्वघोषः। २००४। **बुद्धचरितम्**। पाण्डेयः, श्रीकान्तः(सम्पादकः)। वाराणसीः चौखम्बा संस्कृत सीरीज अफिस।

2 Nagarajuna। 2006। **mūlamādhyamikakārikā**। J. Kalupahana, David(Secretary)। Delhi: Motilal Banaras Publishers Private Limited।

3 माधवाचार्यः। २०१४। **सर्वदर्शनसङ्ग्रहः**(सपरिशिष्टः "प्रकाश"-हिन्दीभाष्योपेतः)। ऋषि, उमाशङ्करः(भाष्यकारः)। वाराणसीः चौखम्बा विद्याभवन।

4 २००८। **तैत्तिरीयोपनिषत्** (वङ्गपुस्तकम्, शाङ्करभाष्यसमेता)। दुर्गाचरणसांख्यवेदान्ततीर्थः, महामहोपाध्यायः(अनुवादकः सम्पादकश्च)। कलिकाताः देव-साहित्य-कुटीर-प्राइभेट-लिमिटेड।

5 २००६। **छान्दोग्योपनिषत्** (वङ्गपुस्तकम्, शाङ्करभाष्यसमेता)। दुर्गाचरणसांख्यवेदान्ततीर्थः, महामहोपाध्यायः(अनुवादकः सम्पादकश्च)। कलिकाताः देव-साहित्य-कुटीर-प्राइभेट-लिमिटेड।

6 सं.-२०६८। **ईशादि नौ उपनिषत्** (शाङ्करभाष्यसमेता)। गोरखपुरः गीताप्रेस (प्रकाशक एवं मुद्रक)।

7 २००९। **कठोपनिषत्** (वङ्गपुस्तकम्)। भूतेशानन्दः, स्वामी (अनुवादकः व्याख्याकारश्च)। कलिकाताः उद्बोधन-कार्यालयः।

8 २०००। **उपनिषद्भाष्यम्** (प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठ-माण्डूक्य-तैत्तिरीयभाष्याणां प्रसिद्धाचार्यान्तरटीकाभिः सटीकतैत्तिरीयवार्त्तिकेन च समलङ्कृतम्)। सं. एस. सुब्रह्मण्यशास्त्री(सम्पादकः)। वाराणसीः श्रीदक्षिणामूर्ति-मठ-प्रकाशन।

9 व्यासदेवः। २०००। श्रीमद्भगवद्गीता। वासुदेवानन्दः (अनुवादकः व्याख्याकारश्च)। कलकाताः उद्बोधनकार्यालयः।

10 व्यासदेवः। २०२३। **श्रीमद्भगवद्गीता**. श्रीपादविश्वनाथचक्रवर्तिमहोदयविरचित-सारार्थवर्षिणीटीकया एवं श्रीयुतबलदेवविद्याभूषणमहोदयविरचित-गीताभूषणभाष्येण समलङ्कृता. प्रकाशकः-

कृष्णदासबाबा. मथुरा: राधाकुण्ड, कुसुमसोवर।

11 महर्षिपतञ्जलिः। २००८। **पातञ्जलयोगदर्शनम्** (व्यासभाष्यसम्बलितं तच्च योगसिद्धि-हिन्दी-व्याख्योपेतम)। व्याख्याकारः- सुरेशचन्द्रश्रीवास्तवः। वारणसी: चौखम्बा सुरभारती प्रकाशन।

12 विश्वारूपानन्दः, स्वामी। २०१७। **वेदान्तदर्शनम्**। कलिकाता: उद्बोधन-कार्यालयः।

13 व्यासदेवः। २०१४। **श्रीमद्भगवद्गीता** (बङ्गपुस्तकम्)। अनुवादकः व्याख्याकारश्च- स्वामी वासुदेवानन्दः। कलिकाता: उद्बोधन-कार्यालयः।

14 व्यासदेवः।सं.- २०६४। श्रीमद्भगवद्गीता(श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता)। अनुवादकः- श्रीहरिकृष्णदासगोयेन्दका। गोरखपुरः गीताप्रेस।

व्यासदेवः। २००९। **श्रीमद्भगवद्गीता** (अष्टटीकोपेता)। सम्पादकः- प. वासुदेवलक्ष्मणशास्त्री-पणशीकरः। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।

ॐॐॐ

**Name (Writter)-** Tridib Roy Mondal,

**(प्रबन्धप्रणेता- त्रिदिवरायमण्डलः)**

**Designation**- Assistant Professor of Diamond Harbour Women's University,
Dept of Sanskrit,

**Postal Address**- Name- Ranjit Kayal, Vill- kalagachhi, P.O- Sarisha, P.S- Diamond Harbour, Dist- South 24 Parganas, Pin- 743368, West Bengal,

**Mobile No.**- 9875459288, 8478815266





## चित्तस्वरूपं तत्स्थितिः तत्कार्याणिच -

## Concept of the Mind, its Stages and Functions

**Dr.Prashanata Kumar Dash**
**Lecturer in Sanskrit**
**Kalinga Institute of Social Sciences**
**Deemed to be University**
**Bhubaneswar-751024**

**Abstract**

आधुनिकसमाजे सर्वे जनाः व्यस्तव्यग्रताजीवनं निर्वापयन्ति ,अतः तेषां कृते कालाभावात् स्वास्थ्यं प्रति प्रयत्नं नेतुं समयः नास्ति अतः बहुषु आमयेषु जानाः आक्रान्ताः जायन्ते, ननु संप्रति करोनाकाले सर्वेजानाः गृहे स्तित्वा निरोगः, चित्तस्य निवृत्तिः भवितुं शक्यते तदर्थं असौ शोधपत्रं सर्वेषां कृते अमोघः औषधी तया कार्यं करिष्यति । परन्तु जनाः तेषां विषयाणामनभिज्ञाः जायन्ते, ते सद्योपचाराय विषाक्तसंमिश्रतानि औषधानि औषधीकेन्द्रात् क्रित्वा सद्योपास्य कामना कुर्वन्ति, तदर्थं पाश्चात्याधुनिकभेषजकाराः नूतनानि औषधानि उत्पाद्य तेषां विक्रयमपि बहुमूल्यैः जानान् प्रति प्रददन्ति, तदनन्तरं शरीरस्य कोऽपि लाभः न जायते परं रोगी क्षीणः रुग्णः जायते । स्वल्पकालस्योपसमनान्तरं पार्श्वप्रतिक्रिया पुनः परिलक्ष्यते। अतः अयं निरोधनिरोगप्रयाशः महर्षि पतञ्जलिना पातञ्जलयोगदर्शने वैज्ञानिकप्रक्रियया विविधेषु दिक्षु निरोधस्य प्राकाराः साधारणीकरणं च भवति इति । ननु स्वल्पकाले कथं निरोधस्योपायाः जायन्ते तदर्थं अनेकाः विद्वासः बहुषु शास्त्रेषु भिन्नाः भिन्नाः पद्धतयः आलोचिताः परन्तु तेषु महर्षिः पतंजलिकृत सिद्धान्तः अतीव प्रामाणिकः । ।अतः महर्षिः पतञ्जलिः अतीव सरलसुलभतया निरोधः निरोगस्य पन्थाः निर्दिशन्ति यत् प्रत्यहं योगी योगस्याभ्यासः क्रियते चेत् तर्हि निश्शङ्कायाः शारीरिकमानसिकदृष्ट्या सः योगी सुस्थः निरोगः च भविष्यति अत्र नास्ति संदेहः ।

***Key words***

*योगः, संयोगः, एकाग्रः, निरोधः,* निराकरणं, *वृत्तिनिरोधः, चित्तनिरोधः, मनसंयम, शारीरिकव्यायामः, कुम्भकः, हठयोगः,प्राणायामः, प्रत्याहारः, धारणा ,ध्यानं,समाधिः ।*

## Introduction:

पूतपवित्रशान्तसुमनोहरहरितकोमलललितकमनीयदिग्वलयातुलनीयातीवप्राचीनतमसंस्कृतियुक्तमिदंभारतवर्षम् । प्रचलितासु विश्वसंस्कृतिकलासु अयं देश अग्रगण्यः । देशस्य गरिमासभ्यता प्रचीनतोत्कृष्टतास्तित्वताकलास्थापत्य संस्कृतिभ्यरनुज्ञायते । एतेषु क्षेत्रेषु अस्माकंदेशः उत्कृष्टतां लभते । ननु अपि मनस्तात्त्विकात्मसाक्षात्कारेषु अयं देशः प्रप्रथमं स्थानं प्राप्यते । अपरं तु अनेके भाषाभाषिणः समग्रदेशे आहिमालयात्कन्याकुमारीं यावत्वसुधैवकुटुम्बकमिव निवसन्ति । एतादृशि भारतवर्षे गुरुशिष्यपरम्पराक्रमेण आगता समस्तविद्या अद्यावधि समाजेऽपि निक्षुणतया उपलभ्यते । तासु सकलविद्यासु दर्शनशास्त्रमतीव प्रसिद्धम् । प्रसिद्धदर्शनेषु योगदर्शनस्यात्यन्तं महत्त्वपूर्णं स्थानं वर्तते। ननु योगे नैक वैज्ञानिकात्मिकाध्यात्मिकाधिभौतिकाधिदैविकमानसिकवायविकशारीरिक-प्रक्रियाणामतिसूक्ष्मतया चर्चा समाधानानि च परिलक्ष्यन्ते । एतानि दुःखनिवृत्तिकारणानि योगशास्त्रेषु निहितानीति हेतोः तत्कालादारभ्य एकविंशतिशतकेऽपि योगशास्त्रं समग्रविश्वे आद्रियते । पुराकाले ऋषियोगीमुनितपस्विसत्यानुसरदिग्द्रष्टात्रिकालदर्शिजितेन्द्रियमृत्युञ्जयचिरञ्जीव्यात्मदर्शिब्रह्मज्ञानिनः सुसमाजनिर्माणाय जनानां नीरोगनिःश्चलोपयोगमार्गं योगशास्त्रे प्रदर्शितवन्तः।

कालक्रमे योगस्य विविधाः भेदाः परिदृश्यन्ते । ते च क्रियायोगः, चर्यायोगः, अद्वैतयोगः, ब्रह्मयोगः, शिवयोगः, सिद्धियोगः, ध्यानयोगः, भक्तियोगः, राजयोगः, ज्ञानयोगः, हठयोगः, कर्मयोगः, मन्त्रयोगः, लययोगः, अमनस्कयोगः, तन्त्रयोगः, नादयोगः, अस्पर्शयोगः, कुण्डलिनीयोगादय इति। योगसाधनं तु यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिभिरात्मानुभावात्मकं परमात्मस्वरूपं परमपदं प्राप्तुं

प्रामुख्यं भजते । सर्वदार्शनिकानां एकं हि परमलक्ष्यं दुःखनिवृत्तिः, दुःखानां शाश्वतमुक्तिः मोक्षः, कैवल्यम्, अपवर्गः, निःश्रेयः, निर्वाणं, परमपदं, ब्रह्मप्राप्तिश्चादयः । अतः श्रीकृष्णेन उच्यते –

**तपस्विभ्योऽधिकोयोगी ज्ञानिभ्योऽपि मतोऽधिकः ।**[1]। इति

अस्मिन्प्रसङ्गे योगी तपस्विनु ज्ञानीषु सर्वेषु श्रेष्ठः । तानि योगसाधनानि वैदिकालेऽपि परिलक्ष्यते इति ऋग्वेदे उदाहरणम् –

**यस्मादृते न सिध्यति यज्ञोविपश्चितश्चन।**

**सधीनांयोगमिन्वति।।**[2] इति

**योगे योगे तवस्तरं वाजे वाजे हवामहे**[3]। इति

